**SAHITYA**
**1st ELECTIVE**

**SASTRI / B.A. Ist YEAR**
**Paper - I**

# PRATAPARUDRIYAM

*( Nayaka-Kavya, Guna-Doshaprakaranani )*


तमसो मा ज्योतिर्गमय

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः
(मानितविश्वविद्यालयः)

**Directorate of Distance Education**

Rashtriya Sanskrit Vidyapeetha

***Accredited at A level by NAAC***

Tirupati - 517 507 (A.P.)

**CHIEF EDITOR**

**Vice-Chancellor**

**GENERAL EDITOR**

Dr.Ch.P.Satyanarayana
Director, DDE

**PROGRAME CO-ORDINATOR**

Prof. R.Deepta

**ADDITIONAL CO-ORDINATORS**

1. Prof. R.Deepta (Academic)
2. Sri.B.chandrasekharam (Technical)

**SUBJECT CO-ORDINATOR**

Prof.G.S.R. Krishna Murthy

**COURSE WRITER**

Dr.Manjusha Channe (Themdeo)

**DIRECTORATE OF DISTANCE EDUCATION**
**R.S.VIDYAPEETHA,**
**TIRUPATI.**

# प्रथमखण्डः - नायकप्रकरणम्

## संरचना

१.० प्रस्तावना।

१.१ लक्षिताधिगमविशेषाः।

१.२ नायकप्रकरणम्।

१.२.१ नायकगुणाः ।

१.२.२ नायकस्वरूपम्।

१.२.३ उदात्तादिनायकविशेषाः।

१.२.४ शृङ्गारनायकाः।

१.२.५ शृङ्गारनायिकाः।

१.३ उपसंहारः

१.४ प्रथमखण्डप्रश्नाः

## १.० प्रस्तावना

'प्रतापरुद्रीयम्' इति श्रीविद्यानाथप्रणीतः अलङ्कारशास्त्रीयः ग्रन्थः। प्रतापरुद्रदेवस्य गुणानाश्रित्य निर्मितोऽयम् अलङ्कारप्रबन्धः 'प्रतापरुद्रीयम्' इति। काकतीयनरेन्द्रः प्रतापरुद्रः आन्ध्रप्रदेशस्य शासकः आसीत्। महाकवेः श्रीविद्यानाथस्य आश्रयस्थानमासीत् एषः काकति-वंशोद्भवः प्रतापरुद्रभूपतिः। प्रतापरुद्रदेवस्य कीर्तिः अनेन ग्रन्थेन प्रकाश्यते।

अत्र हि सन्ति नवप्रकरणानि। तानि च नायक-काव्य-नाटक-रस- दोष-गुण-शब्दालङ्का-रार्था लङ्कारमिश्रालङ्कारान्तानि। तेषु नायक-काव्य-दोष-गुणेत्यादयः- चत्वारः पाठ्यांशरूपेण अध्ययनार्थं स्वीकृताः। तस्मात् वयं सम्प्रति प्रतापरुद्रीयम् इत्यास्मिन् ग्रन्थे श्रीविद्यानाथविरचितं नायकप्रकरणमवलोकयामः।

## १.१ लक्षिताधिगमविशेषाः

- प्रकरणेऽस्मिन् भवान् / भवती नायकगुणान् ज्ञातुं शक्नोति।
- नायकलक्षणं मनसि संस्थाप्य अन्यत्र योजयितुं प्रभवति।
- नायकस्वरूपं वैशिष्ट्यञ्चाधिगत्य परितः विद्यमाननायकानां तुलनां करोति।
- 'प्रतापरुद्रीयम्' इत्यस्य ग्रन्थस्योद्दिष्टम् अवगच्छति।
- नायिकाभेदानपि विवेचयितुम् अर्हति।

**स्वावलोकनप्रश्नाः**

(१) भवद्दृष्टया नायकः कः?

(२) लौकिकनायकेषु प्रियतमनायकस्य वैशिष्टयं लिखत।

(३) लोके नायकगुणान् अभिलक्ष्य स्वमतं प्रतिपादयत।

## १.२ नायकप्रकरणम्

लोकेऽस्मिन् कतिचन जनाः समाजकार्ये अग्रेसराः भवन्ति। अपि च केचन राजकार्यस्य धुरां निर्वहन्ति। केचन क्रीडाक्षेत्रे स्वकीयं नैपुण्यं प्रदर्श्य ख्यातिं लभन्ते। एवमेव तत्तत्क्षेत्रे नेतृत्वं निर्वहतः जनान् वयं 'नेता' इति सम्बोधयामः। ते एव नायकाभिधानेनापि विख्यातास्सन्ति।

अथालङ्कारशास्त्रेऽपि काव्यरूपकेषु गुणवत्पुरुषवर्णनं समुपलभ्यते। यस्मात् तत्काव्यं श्रेष्ठत्वमापाद्य श्रेयस्करं भवति। इमे महापुरुषाः एव 'नायका' इति शास्त्रेषु संज्ञा वर्तते। एवञ्च नायकवर्णनात् गुणवत्पुरुषवर्णनात् वा प्रबन्धस्य उत्कृष्टता। तस्मादेव महाभारतादीनामपि महापुरुषवर्णनपरतयैव विश्वातिशायित्वम्।

तदुक्तमेव भामहेन, 'उपश्लोक्यस्य माहात्म्यादुज्ज्वलाः काव्यसम्पदः'। तथैव 'उदारचरितनिबन्धना प्रबन्धप्रतिष्ठा' इति रुद्रभट्टः। न तावदेव, प्रतिपादितं चोद्भटेनापि -

**'गुणालङ्कारचारुत्वयुक्तमप्यधिकोज्ज्वलम्।**

**काव्यमाश्रयसम्पत्त्या मेरुणेवामरद्रुमः।।' इति।**

अस्यायमाशयः यत् गुणालङ्कारैः सरसतां प्राप्तमपि काव्यं महापुरुषवर्णनाश्रयेण ततोऽपि श्रेष्ठत्वमाप्नोति, यथा सुमेरुपर्वताश्रयेण स्थिताः अमरद्रुमाः इति। यदि लोकोत्तरगुणोत्तरः नायकः वर्ण्येत तर्हि कवेरल्पाऽपि वाणी विद्वत्कर्णयोः भूषणं निश्चयेन सञ्जायते इति भोजराजेन निरूपितम्। अत्र हि नायकः काव्यप्रबन्धस्य विभूषणमिति सिद्धम्। अतश्च अयमलङ्कारप्रबन्धः प्रतापरुद्रदेवगुणवर्णनेन अलङ्कृतः। यथा रामगुणपुरस्सरः ग्रन्थः रामायणवाल्मीकजन्मनोः महाप्रतिष्ठाकारणं तथा प्रतापरुद्रदेवगुणनिरूपणं प्रबन्धप्रतिष्ठाकारणमिति ग्रन्थकारः अभिप्रैति।

वस्तुतः अलङ्कारशास्त्रेषु नाटकप्रकरणे एव नायकप्रकरणस्य अन्तर्भावः सन्दृश्यते। किन्तु ग्रन्थेऽस्मिन् प्रतापरुद्रस्य प्राधान्यं भवत्विति धिया 'नायकप्रकरणम्' पृथकरूपेण विराजते अत्र।

एवञ्च लोकोत्तरकाव्यनायकः वर्ण्य इत्युक्तम्। सः काव्यनायकः कीदृशः इत्याकाङ्क्षायां नायकगुणान् समुपवर्णयति।

**स्वावलोकनप्रश्नाः**

(१) अलङ्कारशास्त्रानुसारेण श्रेयस्करं काव्यं किम्?

(२) उत्कृष्टकाव्यस्य उदाहरणं लिखत।

(३) प्रबन्धप्रतिष्ठाविषये उद्भटमतं प्रतिपादयत।

(४) ग्रन्थकारेण नायकप्रकरणम् पृथकरूपेण किमर्थं विरचितम्?

(५) ग्रन्थेऽस्मिन् कस्य नायकस्य प्राधान्यं विद्यते?

## १.२.१ नायकगुणाः

'नायकगुणग्रथिताः सूक्तिस्रजः सुकृतिनामाकल्पमाकल्पयन्ति' इति साहित्यमीमांसायामपि प्रोक्तम्। तात्पर्यं नायकगुणगणैः विनिर्मितं काव्यं कल्पान्तपर्यन्तं सन्तिष्ठते परं के च ते नायकगुणाः? इति पृष्टे सति 'महाकुलीनत्वादिनायकगुणाः' इति ग्रन्थेऽस्मिन् प्रतिपाद्य प्रस्तुतकारिकामुपस्थापयति।

**महाकुलीनतौज्ज्वल्यं महाभाग्यमुदारता।**
**तेजस्विता विदग्धत्वं धार्मिकत्वादयो गुणाः।।**

**नायकगुणाः**

(१) महाकुलीनता (२) औज्ज्वल्यम् (३) महाभाग्यम् (४) औदार्यम्
(५) तेजस्वित्वम् (६) वैदग्ध्यम् (७) धार्मिकत्वम्

सम्प्रति एकैकशः गुणनिरूपणं क्रियते।

### (१) महाकुलीनता :-

**लक्षणम्** - **'महाकुलीनता नाम कुले महति सम्भवः।'**

अर्थात् महत्कुले जनी। नायकः रूढवंशस्य स्यात्। श्रेष्ठकुले जन्मप्राप्तिः नेतुः गुणः। यथा प्रतापरुद्रदेवः।

भूलोकस्य स्वर्गातिशायि वैभवं काकतीयनरेन्द्राणामासीत्। तत्र हि प्रतापरुद्रः जनीं लेभे।

### (२) औज्ज्वल्यम् :

**लक्षणम् - 'रूपसम्पन्नदेहत्वमौज्ज्वल्यं परिकीर्त्यते।'**

कुण्डलमुक्ताहारनूपुराङ्गदादिचतुर्विधभूषणाभावेऽपि विभूषितम् आकारविशेषरूपम्। कान्तियुक्तदेहः औज्ज्वल्यमिति। आभूषणैर्विना भूषितमिवाभासः इति रूपम्। एवं रूपसम्पन्नदेहः औज्ज्वल्यमिति कथ्यते।

**उदाहरणार्थम्** - महादेवनामकान्महाराजात् राजापुत्र्यां जातः प्रतापरुद्रः मदनरूपमूर्तिरिति ललनाः मन्यन्ते स्म।

## (३) महाभाग्यम् :

**लक्षणम्** - **'विश्वंभराधिपत्यं यत्तनमहाभाग्यमुच्यते।'**

पृथिव्याः सार्वभौमत्वं महाभाग्यमिति। विश्वं बिभर्तीति विश्वंभरा। तस्याः आधिपत्यं सार्वभौमत्वमित्यर्थः। तदैव महाभाग्यमिति।

**उदाहरणार्थम्** - श्रीवीररुद्रो नृपः वर्तते। दुष्टनिग्रहशिष्टपरिपालनाभ्याम् अखिलपृथ्वीसंरक्षणादस्य महाभाग्यम्। यतो हि प्रत्यर्थिपृथ्वीपतीनाम् उत्कर्षलङ्घने अयं गुणनिधिः प्रतापरुद्रः एव सक्षमः।

## (४) औदार्यम् :

**लक्षणम्** - **'यद्विश्राणताच्छील्यमौदार्यं तन्निद्यते।'**

सर्वदा प्रदाने प्रवृत्तिः शीलं वा औदार्यमिति। प्रियोक्त्या आजीवितात् दानमौदार्यमिति।

**उदाहरणार्थम् -** त्रिजगति प्रतापरुद्रसमः वदान्यो नास्ति। यस्य गुणगणौत्कर्षेण दिक्पतीनां यशः तिरस्कृतम्। येन च विद्वज्जनेभ्यः मदगन्धयुक्ताः गजाः प्रदत्ताः।

## (५) तेजस्वित्वम् :

**लक्षणम् - 'जगत्प्रकाशकत्वं यत्तेजस्वित्वं तदुच्यते।'**

जगत्प्रकाशनकर्तृत्वमेव तेजस्वित्वम् इत्यर्थः।

**उदाहरणार्थम्** - स्वपराक्रमेण शत्रोः पराभवं विधाय तस्य गर्वहरणं श्रीप्रतापरुद्रेण कृतम्। सूर्यप्रकाशरहितप्रदेशे प्रकाशव्युत्पत्तिकार्यमेव लोकोत्तरकर्म। तदपि श्रीप्रतापरुद्रेण कृत्वा प्रजासुखमापादितम्। एवं तेजसः प्रकाशनमेव तेजस्वित्वमिति।

## (६) वैदग्ध्यम् :

**लक्षणम् - 'कृत्यवस्तुषु चातुर्यं वैदग्ध्यं परिकीर्त्यते।'**

तात्पर्यं, कर्तव्यार्थेषु प्रयोगकौशलं वैदग्ध्यामिति। दुष्करकार्येऽपि स्वबुद्धिचातुर्येण साफल्यं वैदग्ध्यमिति।

**उदाहरणार्थम् -** यथा वीररुद्रस्य वैदग्ध्यम्। अनेन भूपतिना एकस्मिन् समये एव वितरणविद्वद्गोष्ठीप्रजारञ्जनादिभिः कर्माणि सम्पाद्य क्रमशः श्रीः, सरस्वती पृथ्वी च तोषिता। तत्रेव तस्य चातुर्यम्।

## (७) धार्मिकत्वम् :

**लक्षणम् - 'धर्मैकायत्तचित्तत्वं धार्मिकत्वमुदीर्यते।'**

धर्मं चरतीति धार्मिकः। यः स्वधर्मपालने कुशलः सः धार्मिकः। धार्मिकतायाः तत्त्वं यास्मिन् तत् धार्मिकत्वं नायके आवश्यकम्।

**उदाहरणार्थम्** - प्रतापरुद्राधिपतिः परिहासेऽपि अनौचित्यं, स्वप्नेऽपि परस्त्रीकथा तथा च शत्रावपि मिथ्या - दोषारोपं न सहते स्म।

इत्थं सप्तगुणास्तु नायके अनिवार्या एव। किन्तु तैस्सह महामहिमत्वं पाण्डित्यञ्चावश्यकमिति ग्रन्थकारस्य अभिप्रायः। तत्र हि 'महामहिमत्वं नाम स्याद्या पुनर्देवतात्मता' इति। नायकस्य देवतात्मकत्वमेव महामहिमत्वम्। यथा हि -

'कौसल्याऽऽसीत् प्रथमललना देवकी च द्वितीया
विष्णोर्माता तदनु महिता मुम्मडाम्बा तृतीया।
यस्त्रेतायां रघुपतिरभूद् द्वापरे शौरिरासीत्
त्रातुं क्षोणीं स जयति कलौ वीररुद्रावतारः।।

श्लोकेऽस्मिन् विष्णोः अवतारत्वेन देवतात्मकत्वान्महामहिमत्वं कलियुगे वीररुद्रस्येति। तथैव पाण्डित्यमपि कश्चित् नायकगुणः। सर्वविद्याधिकत्वं पाण्डित्यम्। यथा प्रतापरुद्रस्य सर्वविद्याविशारदत्वमासीत्। कथमिति तत् प्रस्तूयते -

गोष्ठीभिः परितोषयन् बुधगणान् षड्दर्शनीसीमभिः
सत्सारस्वतमार्गदर्शनचणैः सूक्तैः कवीन् प्रीणयन्।
सङ्गीतोपनिषद्रहस्यपिशुनैरातोद्ययोग्यक्रमै-
र्धिन्वन् संसदि वैणिकान् विहरते श्रीकाकतीन्द्रो नृपः।।

नायकगुणवर्णनादनन्तरं नायकस्वरूपं विलिख्यते।।

**स्वावलोकनप्रश्नाः**

(१) 'महाकुलीनत्वादि' इत्यत्र के गुणा निरूपिताः?

(२) 'औदार्यम्' इत्यस्य अर्थं लिखत।

(३) भेदं प्रतिपादयत - औज्ज्वल्यम् तेजस्विता च।

(४) वैदग्ध्यम् इति संज्ञा किं बोधयति?

(५) महामहिमत्वमित्युक्ते किम्?

(६) प्रतापरुद्रस्य सर्वविद्याविशारदत्वं कथमिति प्रतिपादयत।

## १.२.२.नायकस्वरूपम्

इतः पूर्वं नायकस्य सामान्यगुणविवरणं विधाय सम्प्रति नायकस्वरूपं ग्रन्थकारेण निर्दिश्यते। 'नयति प्राप्नोति वृत्तं फलं चेति नायक' इति व्युत्पत्त्या प्रबन्धव्यापी फलवानित्यपि नायकविशेषः। पूर्वोक्तगुणास्तु तस्य सामान्यलक्षणम्। परं विशेषलक्षणमपि ज्ञातव्यमिति अभिव्यञ्जयितुमेव नायकस्वरूपमिदं निरूप्यते।

> यशःप्रतापसुभगो धर्मकामार्थतत्परः।
> धुरन्धरो गुणाढ्यश्च नायकः परिकीर्तितः।। इति।।

प्रस्तुतकारिकायामुल्लेखिताः विशेषाः अधुना क्रमशः प्रतिपाद्यन्ते।

**(१) यशःप्रतापसुभगत्वम् :**

विद्यादिजनितं यशः तथा च कोशदण्डजं तेजः इत्युक्ते प्रताप अमूभ्यां सुभगत्वं सूचितम्।

यथा काकतिवीररुद्रनृपतेः यशोमण्डलं त्रिभुवनोल्लङ्घिनमासीत्। अपि च आतपत्रस्योपरि स्थितं सूर्यचिह्नं तस्य प्रतापं प्रदर्शयति स्म। इत्थं यशःप्रतापाभ्यां प्रतापरुद्रस्य सौभाग्यं संसूचितम्।

**(२) धर्मकामार्थतत्परत्वम् :**

नायके सर्वदा धर्मकामार्थतत्परत्वं स्यात्। अस्यायमाशयः यत् नायकेन धर्मकामार्थेति पुरुषार्थत्रयं परिपालयितुं तत्परः भवितव्यमिति। एवं कृते सति पुरुषार्थत्रयमपि अन्योन्यसम्बन्धेन कार्यं विदधति।

यथा रुद्रनरेश्वरे धर्मोऽर्थ इव पूर्णश्रीः स्थितः अपि च अर्थः धर्म इव संस्थितः। तथैव कामस्ताविव तौ च काम इव कार्यं कुरुतः।

**(३) धुरन्धरत्वम् :**

धुरां धारयतीति धुरन्धरः।

यथा शेषादिभरणीयां विश्वंभरां वीररुद्रो भुजेनैकेन बिभर्तीति विश्वातिशायि धुरन्धरत्वम् प्रतापरुद्रस्य आसीत्। नायकेनापि तथैव भवितव्यम्।

**(४) गुणाढ्यत्वम्**

असङ्ख्येयाः गुणाः गुणाढ्यत्वमिति भावः। तत्रापि प्रस्तुताः अष्टगुणा अनिवार्या एव।

> शोभा विलासो माधुर्यं गाम्भीर्यं स्थैर्यतेजसी।
> ललितौदार्यमित्यष्टौ सात्त्विकाः पौरुषा गुणाः।।

एवमष्टसात्त्विकगुणैः सम्पन्नः नायकः स्यात्। इमे पौरुषगुणाः यास्मिन् सः गुणाढ्य इति। एवं गुणाढ्यत्वं नायकविभूषणमेव।

यथा - मुखैः सहस्रेण फणी वदेच्चेत्

करैः सहस्रेण लिखेद्विवस्वान्।

नेत्रैः सहस्रेण हरिश्च पश्ये

स्थाने गुणान् काकति वीरभर्तुः।।

शेषादय एवास्य गुणानां कथने क्षमाः नान्याः इति तात्पर्यम्। एवमेव सामान्यविशेषगुणैरुपेतं नायकस्वरूपमिति ग्रन्थकारस्य धीः। इतः परं नायकभेदविवरणं क्रियते।

**स्वावलोकनप्रश्नाः**

(१) 'सुभगत्वम्' इत्युक्ते किम्?

(२) पुरुषार्थपालने नायकेन कथं भवितव्यम्?

(३) नायके के सात्त्विकाः गुणाः प्रोक्ताः?

(४) 'यशःप्रतापः . . .।' इति कारिकां परिपूरयत्।

### १.२.३ उदात्तादिनायकविशेषाः

अथ नायकस्वरूपादनन्तरं नेतृविशेषान् प्रदर्श्य नायकभेदान् विवृणोति ग्रन्थकारः। तत्र हि सर्वरससाधारणाश्चत्वारो नायकाः। ते च के? इति प्रस्तुतकारिकया ग्रन्थकारेण श्रीविद्यानाथेन प्रोक्ताः।

उदात्त उद्धतश्चैव ललितः शान्त इत्यपि।
धीरपूर्वा इमे पूर्वैश्चत्वारो नायकाः स्मृताः।।

**नायकभेदाः**

धीरोदात्तः    धीरोद्धतः    धीरललितः    धीरशान्तः

प्रायशः भारतीयनाटकेषु धैर्यमपेक्ष्यते। तस्मादेव 'धीरः' इति विशेषणमुदात्तादीनां पूर्वं प्रयुक्तम्। अधुना एकैकशः अमीषां स्वरूपमुदाहरणञ्च व्याख्यास्यामः।

**(१) धीरोदात्त :**

**लक्षणम्** - **महासत्त्वोऽतिगम्भीरः कृपावानविकत्थनः।**
**प्रतापरुद्रवद्धीरो धीरोदात्तः स सम्मतः।।**

**तात्पर्यम्** - शोकक्रोधाद्यनभिभूतान्तःकरणो महासत्त्वः इति। अयमेव धीर इत्याहुः। सत्यपि विकारे सावहित्थो गम्भीरः। परदुःखापहरणेच्छुः कृपावान्। आत्म श्लाघाविहिनोऽविकत्थनः। एवं गुणको यः प्रतापरुद्रवद्वर्तते स धीरोदात्त इति। एवञ्च सर्वोत्कर्षेण वृत्तिरौदात्त्यमिति फलितम्। अत्र स्थैर्यादिसामान्यगुणानां विशेषलक्षणेषूपादानं तत्रावश्यकत्वसूचनार्थम्।

**उदाहरणार्थम्** - प्राणिनां सन्दिग्धे श्रीवीररुद्रनृपतिः कृपया मृदुर्न तु कातर्येणेत्यनेन महासत्त्वोच्यते। तथैव पुरः स्थितानरीन् स अल्पकाले एव हन्ति। वन्दिविहितप्रशंसाकर्णनेनैव लज्जते सः। तस्माद् आत्मश्लाघा तु दूरत एवेत्यविकत्थनत्वम्। इष्टानुभवजन्य आनन्दः सुखम्। सापराधविषयोऽमर्षो रोषः। इष्टलाभजन्यो मनःप्रसादो हर्षः। तेषां पिशुनान् सूचकानाकारानक्षिनिमीलनभ्रुकुटिमुखरागादीन् वक्त्रे मनागीषदपि न धत्ते इत्यवहित्थया गाम्भीर्यं तस्य। एवं त्रैलोक्यम् अतिशयालुः कीर्तिसुभगः श्रीवीररुद्रो नृपोऽयम्। अत्र हि स्थैर्यधार्मिकत्वकीर्तयः साधारणगुणाः कृपादयस्तु विशेषाः सन्ति।

### (२) धीरोद्धत :

**लक्षणम्-** **दर्पमात्सर्यभूयिष्ठश्चण्डवृत्तिर्विकत्थनः।**
**मायावी सुलभक्रोधः स धीरोद्धत उच्यते।।**

दर्पः शौर्यादिमदः। मात्सर्यम् असहनमसूयेति। ताभ्यां भूयिष्ठष्श्चण्डवृत्तिः रौद्रः। विकत्थन आत्मश्लाघापरः। मन्त्रादिबलेनाविद्यमानवस्तुप्रकाशकः केवलवञ्चको वा मायावी। सुलभक्रोधः नाम शीघ्रक्रोधः। ईदृशः नायकः धीरोद्धतो भवति।

**उदाहरणार्थम्** - रे रे घूर्जर! भवान् युद्धे जर्जरः जातः अतः युद्धार्थमक्षमः। हे लम्पाक! किं कम्पते? किमर्थं भयेन व्याकुलः? रे वङ्ग! किमर्थं मिथ्या राजबलात् वक्रगत्या गमनम्? हे हूण! स्वप्राणान् रक्षत। भवतः राष्ट्रमपराष्ट्रमस्ति वयं तु योद्धारः स्मः। एवम् आन्ध्रक्ष्माभृभटाः इति अरीनभिभवन्ति।

अत्र घूर्जरादिवाक्येषु यथायोगमुद्भावितैः दर्पमात्सर्यादिभिर्यौद्धारो वयम्, इत्यात्मश्लाघया चान्ध्रक्ष्माभृद्भटानां धीरोद्धतत्वम्।

## (३) धीरललितः

**लक्षणम् - निश्चिन्तो धीरललितः कलासक्तः सुखी मृदुः।**

यः सुतसचिवादिविनिहितयोगक्षेमतया चिन्ताविरहितो निश्चिन्तोऽस्ति। अत एव कलासु गीतादिषु आसक्तः। सुखी इत्युक्ते भोगप्रवणः। शृङ्गारप्रधानत्वात् सुकुमाराकारो मृदुरिति धीरललितः नायकः।

**उदाहरणार्थम्-** शौर्योष्मानिरवग्रहः प्रतिनृपाः सर्वेऽपि नम्रीकृताः।
पातिव्रत्यमुपैति भूरियमयं नाथः स्वयंभूः शिवः।।

धीरोऽयं युवराज एव वहति श्रीकाकतीन्द्रो धुरं
सर्वामित्यनुमोदते प्रतिकलं श्रीकाकतीन्द्रो नृपः।।

अत्र अनर्गलशौर्यादिभिर्दैवानुकूल्येन युवराजस्य धुरन्धरत्वेन च निश्चिन्तः सकलकलासुखमनुभवतीति वीररुद्रकुलज्येष्ठस्य धीरललितत्वम्।

## (४) धीरशान्तः

**लक्षणम् - 'धीरः शान्तः प्रसन्नात्मा धीरशान्तो द्विजादिकः।'**

अत्र हि विवेचयति क्लेशसहिष्णुः धीरः, शमप्रधानः शान्तः, हृष्टान्तःकरणः प्रसन्नात्मा इति। द्विजादिक इत्यादिग्रहणात् वणिक्सचिवौ विवक्षितौ। तथैव 'सामान्यगुणयुक्तस्तु धीरशान्तो द्विजादिकः' इति दशरूपककारः। **उदाहरणार्थम्**

वीरं रुद्रनृपालरन्तमभितः प्राप्तोदयं मोदते
सङ्ख्यावद्गण एष पूषणमिव प्रत्यग्रमब्जाकरः।
उन्मीलत्कमलाविहारवसतिर्भूत्वा विकासैर्निजै -
र्विश्वामोदमुदञ्चयन्नविरतं दोषावसानोत्सुकः।।

अत्र हि विदुषा गण इति सङ्ख्यावद्गणः। प्राप्तोदयोऽभिवृद्धिरिति। अन्यत्रोदयाचल इत्यर्थः। प्रत्यग्रमुभयत्राभिनवम् इत्यर्थः। उन्मीलन्त्या उल्लसन्त्याः कमलायाः सम्पत्तेरन्यत्र च लक्ष्म्या विहारवसतिः सूचितम्। विकासैरुत्सवादिभिरन्यत्र दलविश्लेषैः विश्वस्यामोदः हर्षः। अन्यत्र गन्धविशेषमुदञ्चयन् इति उद्बोधयति। दोषावसानं पापोपशमः अन्यत्र दोषायाः रात्रवासानं प्रभातमिति। अत्र दोषावसानेत्यादौ धैर्यशान्त्योर्विश्वामोदमित्यादौ प्रसादादेश्च प्रतिपादनात् विप्राणां धीरशान्तत्वम्।

अत्र धीरोदात्तादीनां सर्वरससाधारण्येऽपि यथाक्रमं वीररौद्रशृङ्गारशान्तरसानां प्रधानत्वं वक्ष्यमाणविशेषलक्षणपर्यालोचनया विज्ञेयम्।

स्वावलोकनप्रश्नाः

(१) सर्वरससाधारणाः के चत्वारो नायकाः?

(२) 'महासत्त्वः' इत्यस्य कोऽर्थः?

(३) धीरललितस्य लक्षणं लिखत।

(४) दशरूपककारेण धीरशान्तस्य कीदृशं लक्षणं प्रोक्तम्?

(५) 'द्विजाजिक' इत्यादिग्रहणात् कौ विवक्षितौ?

पूर्वोक्ताः नायकप्रकाराः तेषां स्वभावमनुलक्ष्य कथिताः। अधुना नायकस्य प्रेमव्यापारमाधारीकृत्य नायकभेदाः प्रदर्शिताः।

**१.२.४ शृङ्गारनायकाः**

शृङ्गारविषयमधिकृत्य कृतं नायकविभाजनमधुना निरूप्यते। तत्र हि -

अथ शृङ्गारविषयाश्चत्वारो नायका इमे।
अनुकूलो दक्षिणश्च धृष्टः शठ इति स्मृताः।।

अथ शृङ्गारनायकानां यथाक्रममुद्देशलक्षणोदाहरणानि अस्माभिः अवलोक्यन्ते।

**(१) अनुकूलशृङ्गारनायक :**

**'लक्षणम् - एकायत्तोऽनुकूलः स्यात्।'**

एकस्यां नायिकायां विशेषानुरक्तोऽनुकूलो नायकः। यथा - प्रतापरुद्रस्य क्षोण्यां विशेषानुरागोऽन्यत्र न तथेत्यानुकूल्यम्।

**(२) दक्षिणशृङ्गारनायक :**

**लक्षणम् - 'तुल्योऽनेकत्र दक्षिणः।'**

अनेकासु नायिकासु अवैषम्येण स्नेहानुवर्ती दक्षिणो नायकः। समानुरागत्वप्रतीतिः सर्वासु यस्य सः दक्षिणनायकः। यथा -

वाणीं मुखेन नेत्राभ्यां श्रियं दोष्णा च मेदिनीम्।
मानयंस्तुल्यतां धत्ते तासु रुद्रनरेश्वरः।।

**(३) धृष्टशृङ्गारनायक :**

**लक्षणम् - 'व्यक्तगा गतभीर्धृष्टः।'**

अपराधाभिव्यक्तिनिर्भीकत्वं चेति धृष्टत्वम्। यथा - राज्यश्रीसम्भोगः मया कृतः इत्यस्मात् सर्वाङ्गं सम्भोगचिह्नैः चिह्नाङ्कितमिति राज्ञा अङ्गीक्रियते। अत्रैव तस्य धृष्टत्वम्।

**(४) शठशृङ्गारनायक :**

**लक्षणम् - 'गूढविप्रियकृच्छठः।'**

नायिकामात्रविदितविप्रियकारी शठः। नायकस्य विप्रियकारित्वं केवलं नायिकया अवगम्यते तेन हि सः शठः। यथा हि -

नायिकया उच्यते, दृष्टया केवलं पश्यसि न मनसा। वाचा प्रियं भाषसे न मनसा। भुजान्तरं प्रकटयसि केवलं न चाभ्यान्तरम्। अतः हे काकतिनाथ ! तव चिन्तनप्रक्रिया तद् स्पष्टं यत् भूरेव तव प्राणेश्वरीति। तस्माद् माद्दक्षेषु विडम्बनेन अलम्। अत्र नायिकामात्रविदित-भावशून्यदर्शनादिविधानात् अस्य शठत्वम्।

अस्य शृङ्गारनायकस्य नायिकानुकूलने सहायास्सन्ति पीठमर्दविटचेटविदूषकनामानः। प्रस्तुतकारिकायां तेषां स्वरूपं निरूपितमस्ति।

**किञ्चिदूनः पीठमर्दः एकविद्यो विटः स्मृतः।**
**सन्धानकुशलश्चेटो हास्यप्रायो विदूषकः।।**

**(१) पीठमर्दः** - प्रधानेतिवृत्तनायकात् ईषन्न्यूनगुणः यस्मिन् सः पीठमर्दः इति।

**(२) विटः** - गीतादिविद्यानां नायकोपयोगिनीनाम् एकस्याः विद्यायाः वेदिता विटः भवति।

**(३) चेटः** - नायकनायिकयोः समागमे यः सहायकः सः चेटः इत्युच्यते।

**(४) विदूषकः** - वाक्याङ्गवेषविकारादिना हास्यकारी विदूषकः।

**स्वावलोकनप्रश्नाः**

(१) शृङ्गारनायकभेदान् प्रतिपादयत।

(२) शृङ्गारनायकस्य सहायाः के सन्ति?

(३) शृङ्गारविषयमधिकृत्य कति नायकभेदाः प्रोक्ताः?

अथ शृङ्गारनायकस्य नायिका कीदृशी स्यादिति प्रश्नः भवतां मनसि उदेति। तस्य समाधानमधुना क्रियते।

### १.२.५ शृङ्गारनायिकाः

शृङ्गारनायिकानां कतिचन विशेषास्सान्ति। तानाधारीकृत्यैव अष्टविधाः शृङ्गारनायिकाः प्रकीर्तिताः। ताः शृङ्गारनायिकाः यथा -

शृङ्गारनायिकाः —
- (१) स्वाधीनपतिका
- (२) वासकसज्जिका
- (३) विरहोत्कण्ठिता
- (४) विप्रलब्धा
- (५) खण्डिता
- (६) कलहान्तरिता
- (७) प्रोषितभर्तृका
- (८) अभिसारिका

सम्प्रति तासां क्रमशः लक्षणोदाहरणानि निरूप्यन्ते।

### (१) स्वाधीनपतिका

**लक्षणम् - प्रियोपलालिता नित्यं स्वाधीनपतिका मता।**

या प्रियद्वारा नित्यं लालिता सा स्वाधीनपतिका। यस्याः पतिः सर्वदा तस्याः अधीनः सा। उदाहरणार्थम्-

**प्रियां सर्वसहां तैस्तैर्विशेषैरुपलालयन्।**
**प्रतापरुद्रनृपतिः प्रतिक्षणमवेक्षते।।**

अत्र सर्वसहा नाम्नी नायिका पृथिव्यार्थेऽपि दृश्यते। अस्याः सर्वकामनापरिपूरकः

प्रतापरुद्रनृपतिः प्रतिक्षणं दक्षः भवति। तात्पर्यं भूपरिपालने नित्यजागरुकोऽयं सर्वदा तस्याः आसन्नत्वात् सा स्वाधीनपतिकेति।

**(२) वासकसज्जिका :-**

**लक्षणम् - प्रियागमनवेलायां मण्डयन्ती मुहुर्मुहुः।**
**केलीगृहं तथात्मानं सा स्याद्वासकसज्जिका।।**

प्रियागमनवेलायां या केलीगृहमात्मानञ्च भोगोपकरणैः सज्जीकरोति सैव वासकसज्जिका।

यथा - **स्वतेजसा परिष्कृत्य प्रधानागारमुत्कया।**
**श्रियाभिषेकवेलायां वीररुद्रः प्रतीक्षितः।।**

राज्याभिषेकवेलायां लक्ष्मीः स्वतेजसा प्रधानभवनम् अलङ्कृत्य उत्कण्ठितमनसा वीररुद्रस्य प्रतीक्षामारब्धवती। अतः सा वासकसज्जिका।

**(३) विरहोत्कण्ठिता :-**

**लक्षणम् - चिरयत्यधिकं कान्ते विरहोत्कण्ठितोन्मनाः।**

प्रियागमने विलम्बः सञ्जातश्चेत् विरहेन उन्मना सा विरहोत्कण्ठिता। उदाहरणार्थम् -

**न शङ्काऽन्या तादृग्गुणपरिमले रुद्रनृपतौ**
**कया वा गोष्ठयासौ चिरयति सखीभिर्न सुलभः।**
**समानेतुं कान्तं व्रज मदन! बद्धोऽञ्जलिरयं**
**यतो विष्वद्रीचः किरति किरणांस्त्वत्प्रियसखः।।**

लोकोत्तरगुणसम्पन्नवीररुद्रे नायिकान्तरासक्तिरूपा शङ्का नैव उदेति। तथापि असौ चिरयति इत्यस्मात् विरहोत्कण्ठिता नायिका अत्र।

**(४) विप्रलब्धा :-**

**लक्षणम् - क्वचित् सङ्केतमावेद्य दयितेनाथ वञ्चिता।**
**स्मरार्ता विप्रलब्धेति कलाविद्भिः प्रकीर्त्यते।।**

स्वयमेव सङ्केतं कृत्वा सङ्केतस्थानमनागतात् नायकात् वञ्चिता तथा च कामविह्वला नायिका विप्रलब्धेति कलाविद्भिः कथ्यते। यथा -

**गच्छाग्रे सखि! का प्रियागमकथा प्राप्तो निशीथः परं**
**सङ्केतालय! मोक्ष्यसे मम वृथा जातोऽश्रुभिः पङ्किलः।**
**यद्वा रुद्रनरेश्वरे प्रियतमे राज्यश्रियो वल्लभे**
**भारत्या दयिते भुवः कृतपदाः प्रायो वयं वञ्चिताः।।**

अत्र सङ्केतमावेद्य दयितेन प्रियेण वा वञ्चिता सती कामातुरेयं विप्रलब्धा।

**(५) खण्डिता :-**

**लक्षणम् - नीत्वाऽन्यत्र निशां प्रातरागते प्राणवल्लभे।**
**अन्यासंभोगचिह्नैस्तु कुपिता खण्डिता मता।।**

कस्याश्चित् अन्यनायिकायाः गृहे निशां यापयित्वा प्रातः प्रत्यागतः प्राणप्रियः। तदा तस्य शरीरे संभोगचिह्नानि विलोक्य कुपिता नायिका 'खण्डिता' इत्युच्यते। उदाहरणार्थम् -

**रात्रिर्यामत्रयपरिमिता वल्लभास्ते सहस्त्रं**
**मार्गासक्त्या मम गृहमपि प्रातरेवागतोऽसि।**
**किं कर्तव्यं वद नृपतिभिर्वीक्षणीया हि सर्वाः**
**को वा दोषस्तव पुनरहं काममायासयित्री।।**

**(६) कलहान्तरिता :-**

**लक्षणम् - कोपात् प्रियं पराणुद्य पश्चात्तापसमन्विता।**

**कलहान्तरिता नाम सूरिभिः परिकीर्तिताः।।**

या पूर्वं प्रियं तिरस्कृत्य/अनादृत्य पश्चात्तापं करोति सा कलहान्तरितेति विद्वद्भिः कथ्यते। यथा -

**तथा तथा अनुनयन् प्रियस्त्वया हृदय! रोषकलुषेण।**

**अवधीरितो न ज्ञातो राजेति वियोगवेदनां सहस्व।।**

तादृशं प्रियं राजानम् अनादृत्य किमर्थमधुना दूयसे इति। अत्र हृदयोपालम्भात् इयं कलहान्तरिता।

**(७) प्रोषितभर्तृका :-**

**लक्षणम् - देशान्तरगते कान्ते खिन्ना प्रोषितभर्तृका।**

कार्यतः कान्तस्य देशान्तरगमनेन खिन्ना प्रोषितभर्तृकेति। यथा -

**त्रैलोक्यप्रथमानकीर्तिमहतः श्रीवीररुद्रप्रभोः**

**सेवार्थं चिरयत्सु काकतिपुरे भूपेषु, तद्योषितः।**

**द्वारासक्तदृशो नयन्ति दिवसान्, व्युष्टाशया च क्षपा-**

**स्तद्ध्यानप्रतिबद्धसान्द्रपुलकव्याकीर्णकामेषवः।।**

अत्र चिन्ताजागरादिप्रतिपादनात् खिन्नत्वेन इयं प्रोषितभर्तृका।

**(८) अभिसारिका :-**

**लक्षणम् - कान्ताभिसरणोद्युक्ता स्मरार्ता साऽभिसारिका।**

या कामार्ता सती कान्तम् अभिसर्तुम् उद्युक्ता सा अभिसारिका। यथा -

**सम्भ्रमैरलमल्पज्ञे! प्रेयानस्तु महीपतिः।**

**करेणुस्था न पश्यामि न शृणोम्यभिसारिकाम्।।**

अत्र कान्तकर्मकाभिसरणमुक्तम्।

**स्वावलोकनप्रश्नाः**

(१) शृङ्गारनायिकाः कतिविधाः?

(२) स्वाधीनपतिकायाः सामान्यलक्षणं किम्?

(३) विप्रलब्धेति कदा सम्बोधनम्?

(४) प्रियं तिरस्कृत्य का पश्चात्तापं विदधाति?

(५) कान्ताभिसरणं कस्याः वैशिष्टयम्?

यथा नायिकानुकूलने सहायाः तथैव नायकानुकूलने सहायाः भवन्ति। ताश्च काः? इति अधो निर्दिश्यते।

**दूत्यो दासी सखी कारुर्धात्रेयी प्रतिवेशिनी।**

**लिङ्गिनी शिल्पिनी स्वा च सहायाः परिकीर्तिताः।।**

सङ्क्षेपेण नायिका त्रिधा - मुग्धा मध्या प्रौढा चेति। आसां लक्षणानि प्रस्तुतकारिकया उच्यन्ते।

**उदयद्यौवना मुग्धा लज्जाविजितमन्मथा।**

**लज्जामन्मथमध्यस्था मध्यमोदितयौनना।**

**स्मरमन्दीकृतव्रीडा प्रौढा सम्पूर्णयौवना।।**

लज्जया कामविकारान् गोपयति एवम् उदयद्यौवना मुग्धेति। लज्जा तथा च कामविकारः द्वयोः मध्यमा स्थितिः यस्यां सा मध्येति। कामोद्रेकात् गतलज्जा सम्पूर्णयौवना प्रौढेति। प्रणयक्रीडानैपुण्यं विचार्य एताः प्रकाराः निर्दिष्टाः इति।

**स्वावलोकनप्रश्नाः**

(१) नायकानुकूलने काः नायिकायाः सहायाः?

(२) सङ्क्षेपेण काः त्रिधा नायिकाः?

## १.३ ={É° É¼Æ®ú

खण्डेऽस्मिन् 'प्रतापरुद्रीयम्' इत्यस्मिन् ग्रन्थे विवेचितं नायकप्रकरणमधिगत्य चर्चा समुपलभ्यते। लोकोत्तरकाव्यनायकः प्रबन्धस्य प्रतिष्ठाकारणं तस्मात् नायकवैशिष्ट्यान्यत्र वर्णितानि। महाकुलीनत्वादि सप्तगुणाः नायके अनिवार्याः सन्ति। तेन हि तेषां विवरणं विधाय नायकस्वरूपं सोदाहरणं प्रतिपादितम्। यद्यपि सर्वरससाधारणाः चत्वारो नायका तथापि प्रेमव्यापारमनुलक्ष्यापि नायकभेदाः निर्दिष्टाः। शृङ्गारनायका इव शृङ्गारनायिकावर्णनमपि अत्र उपपद्यते।

**प्रथमखण्डप्रश्नाः**

(१) 'प्रतापरुद्रीयम्' इति ग्रन्थमधिकृत्य नायकगुणान् निरूपयत।

(२) श्रीविद्यानाथदिशा नायकस्वरूपं विवेचयत।

(३) उदात्तादिनायकभेदान् प्रतिपादयत।

(४) श्रीविद्यानाथेन प्रतिपादितानि शृङ्गारनायकलक्षणानि विशदयत।

(५) अष्टनायिकास्वरूपं सोदाहरणं चर्चयत।

# द्वितीयखण्डः काव्यप्रकरणम्

**संरचना**

२.० - प्रस्तावना

२.१. लक्षिताधिगमविशेषाः

२.२. काव्यस्वरूपम्

२.२.१. काव्यसम्पद्परिचयः

२.२.२. शब्दवृत्तयः

२.२.३. कौशिक्यादिवृत्तयः

२.२.४. रीतयः

२.२.५. काव्यशय्या,

२.२.६. द्राक्षादिपाकाः

२.२.७. काव्यभेदाः

२.२.८. ध्वनिविशेषाः

२.३. महाकाव्यादिप्रबन्धाः

२.४. क्षुद्रप्रबन्धाः

२.५. उपसंहारः

२.६. प्रश्नाः

## २.०. प्रस्तावना

काव्यमिति पदममस्माकं कृते सुपरिचितमेव। रामायणमहाभारतादीनि महाकाव्यानीति वयं जानीमहे। इदं काव्यनिर्माणं कथं भवति? तत्र के के अंशाः अन्तर्भूतास्सन्ति? तस्य स्वरूपं कीदृश्यम् ? इत्येतादृशाः प्रश्नाः मनसि समुद्भवन्ति। तेषां समाधानाय पुरा काव्यशास्त्रविद्भिः

काव्यस्वरूपं व्यपदिष्टम्। तदाधारीकृत्यैव ग्रन्थकारेणानेनापि विषयोऽयं चर्चितः। तस्मादधुना 'प्रतापरुद्रीयम्' इत्यस्मिन् ग्रन्थे समुपस्थापिताः काव्यांशाः अत्र विविच्यन्ते।

## २.१. लक्षिताधिगमविशेषाः

- छात्रः काव्यस्वरूपं जानाति।
- काव्यसम्पदः ज्ञानं प्राप्नोति।
- शब्दार्थशक्तिविषयम् अवगत्य लौकिकशब्दशक्तिपरीक्षणं विधातुं समीहते।
- काव्यभेदबोधम् अवाप्य काव्यस्य विभाजनं कर्तुं प्रभवति।
- ध्वनिविशेषान् ज्ञात्वा काव्येषु ध्वनितत्त्वमन्वेष्टुं शक्नोति।
- इतरालङ्कारग्रन्थानाम् अध्ययने रुचिं सम्पादयति।

## २.२. काव्यस्वरूपम्

गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ।
गद्यपद्योभयमयं काव्यं काव्यविदो विदुः।।

गुणालङ्कारसहितौ = गुणेन चालङ्कारेण चोपेतौ युक्तौ वा तौ शब्दार्थौ।
शब्दार्थौ = शब्दश्च अर्थश्च। दोषवर्जितौ = दोषरहितौ अदोषौ वेति।
गद्यपद्योभयमयम् = गद्य - पद्य - उभयमिति त्रिविधम्।

अस्यां कारिकायां काव्यलक्षणं निरूपितम् । जानीहि, शब्दार्थौ शब्दार्थयुगलमित्यर्थः। किन्तु तत्शब्दार्थयुगलं कथं स्यादिति विचारणायां विवृणोति ग्रन्थकारः यत् सगुणम् , अदोषम् अलङ्कारयुक्तं चेति। एतादृशं शब्दार्थयुगलं तत्काव्यम् । अतः अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यमिति काव्यसामान्यलक्षणमत्र व्यपदिष्टम्।

अत्र हि अदोषाविति - काव्यत्वविघटका ये च्युतसंस्कारादयः प्रबलदोषाः तद्रहिताविति। अत्रत्य विशदविचारस्तु तृतीयखण्डे अस्मिन्नेव ग्रन्थे उपपद्यते। सगुणाविति - माधुर्यौजःप्रसादाख्या

ये गुणास्तत्सहिताावित्यर्थः। यद्यपि गुणानां रसैकनिष्ठत्वं तथापि परम्परया रसाभिव्यञ्जकशब्दार्थनिष्ठत्वमिति भावः। एतेषां काव्यगुणानां विषयेऽपि सविस्तरं वर्णनमत्रैव चतुर्थखण्डे समासादितमस्ति। अलङ्कारसहताविति - यमकादयः शब्दालङ्काराः उपमादयस्तु अर्थालङ्काराः तत्सहितावित्यर्थः। सालङ्कारौ शब्दार्थौ इत्यर्थः।

एभिः विशेषणैः प्रतिपाद्यौ शब्दार्थौ काव्यमिति प्रचक्षते। इदं काव्यलक्षणं मम्मटाचार्यस्य 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती' इति लक्षणमनुकरोति। तदिदं काव्यं त्रिविधम् ।

काव्यम्

| गद्यम् | पद्यम् | उभयम् (गद्यपद्यसहितमिति) |
|---|---|---|
| (हर्षचरितादि) | (रघुवंशादि) | (नलचम्वादि) |

एवं काव्यलक्षणं विधाय काव्यप्रकारान् चोक्त्वा काव्यसम्पदः विवरणं क्रियते।

स्वावलोकनप्रश्नाः

१. 'गुणालङ्कारसहतौ' इति कस्य विशेषणम् ?

२. काव्यलक्षणे अदोषाविति केनोद्देशेन संसूचितम् ?

३. अत्र काव्यं कतिविधं प्रोक्तम् ?

४. ग्रन्थकारः कस्य काव्यलक्षणम् अनुकरोति?

### २.२.१. काव्यसम्पद्परिचयः

शब्दार्थशरीरं तावत्काव्यम्। यथा मानवशरीरें आत्मना सह गुणदोषादि भवन्ति तथैव काव्यशरीरस्यापि। तस्य परिचयः साम्प्रतं प्रदीयते। अधोनिर्दिष्टासु कारिकासु सा काव्यसामग्री वक्ष्यते।

**शब्दार्थौ मूर्तिराख्यातौ जीवितं व्यङ्ग्यवैभवम् ।**
**हारादिवदलङ्कारास्तत्र स्युरुपमादयः।।**

**श्लेषादयो गुणास्तत्र शौर्यादय इव स्थिताः।**
**आत्मोत्कर्षावहास्तत्र स्वभावा इव रीतयः।।**

**शोभामाहार्यिकी प्राप्ता वृत्तयो वृत्तयो यथा।**
**पदानुगण्यविश्रान्तिः शय्या शय्येव सम्मता।।**

**रसास्वादप्रभेदाः स्युः पाकाः पाका इव स्थिताः।**
**प्रख्याता लोकवदियं सामग्री काव्यसम्पदः।।**

अवगच्छन्तु भवन्तः यत् ग्रन्थकारः श्रीविद्यानाथः मानवशरीरं काव्यशरीरम् इत्यनयोः तुलनां विधत्ते। मानवतनुः इव काव्यतनुरिति विचार्य द्वयोः साम्यं प्रदर्शितमत्र कारिकासु।

अत्र हि शब्दश्च अर्थश्च काव्यमूर्तिः नाम काव्यशरीरमिति निर्दिष्टम् । जीवितमित्यस्यार्थः आत्मा। अस्य काव्यस्य जीवितं व्यङ्ग्यवैभवम् । व्यङ्ग्यवैभवम् इत्युक्ते ध्वन्यादिवैभवम् । अयमेव ध्वनिः काव्यस्यात्मा नाम जीवितम् । यथा शरीरस्य हारादि अलङ्काराः तद्वदेव काव्यस्य उपमाद्यलङ्काराः। शौर्यादयः गुणाः शरीरे सन्तिष्ठन्ते तद्वदेव श्लेषादयः गुणाः काव्यस्थितास्सन्ति। अपि च ते गुणाः काव्यात्मोत्कर्षावहाः। रीतयः काव्यशरीरे स्वभावा इव। मानवस्वभावास्तु जातिप्रयुक्तधर्माश्चेष्टादयः। परं काव्यस्वभावाः वैदर्भीप्रभृतयः रीतयः। वृत्तयो वर्तनानि। मानववर्तनं द्विविधम् । स्वाभाविकं कृत्रिमञ्चेति। अतः शोभावृत्तिः नाम स्वाभाविकवृत्तिः।

आहार्यिकी इत्युक्ते कृत्रिमा। एवम् आहार्यशोभेति मानववृत्तयः तद्वदेव कैशिक्यादयः काव्यवृत्तयः। पदानामानुगुण्यं नाम पदविनिमयासहिष्णुत्वं शय्येति। यथा मानवस्य विश्रान्तिस्थानं शय्या वर्तते तथैव पदानामानुगुण्यं काव्यस्य शय्या कथ्यते। रसः शृङ्गारादिरास्वाद्यते येन गाम्भीर्येण तस्य विशेषाः रसास्वादप्रभेदाः। लौकिकपाकाः यथा रसास्वादजनकाः तथा द्राक्षापाकादयः काव्यरसास्वादने कारणीभूतास्सन्ति।

इत्थं लोके शरीरादिलोकसामग्री सन्दृश्यते तद्वदेव काव्यलोके शब्दार्थादिकाव्यसामग्री। इतः परं काव्यसामग्री सविस्तरं विविच्यते।

**स्वावलोकनप्रश्नाः**

१. आत्मोत्कषविहाः के?

२. काव्यस्य केऽलङ्काराः?

३. किं काव्यजीवितम् ?

**२.२.२. शब्दवृत्तयः**

पूर्वोक्तमेव काव्यमूर्तिः शब्दार्थौ इति। तदधुना विवेचयति अत्र। वाचकलक्षकव्यञ्जकत्वेन त्रिविधं शब्दजातम् । अर्थात् काव्ये वाचको लाक्षणिको व्यञ्जकश्चेति त्रिधा शब्दः। अभिधा - लक्षणा -व्यजनाव्यापारैः अर्थावबोधकाः शब्दाः वाचकलक्षकव्यञ्जकाः। तैरेव बोध्या अर्था वाच्यलक्ष्यव्यङ्ग्या इति। तस्मादेव वाच्यलक्ष्यव्यङ्ग्यत्वेनार्थजातमपि त्रिविधमेव। तेन हि अभिधालक्षणाव्ञ्जनाख्यास्तिस्रः शब्दवृत्तयः।

इदमत्र अवधेयम् ।

शब्दवृत्तिः शब्दार्थः

**शब्दः**
→ वाचकः → अभिधा → वाच्यार्थः
→ लक्षकः → लक्षणा → लक्ष्यार्थः
→ व्यञ्जकः → व्यञ्जना → व्यङ्ग्यार्थः

**१. अभिधाशब्दवृत्तिः** - लक्षणम् - तत्र सङ्केतितार्थगोचरः शब्दव्यापारोऽभिधा।

सङ्केतितार्थबोधजनको व्यापारोऽभिधेति। सङ्केतश्च शक्तिग्राहकः समयः स च अस्मात् शब्दादयमर्थः बोद्धव्य इति सूचयति। इह लोकव्यवहारे अन्वयव्यतिरेकाभ्यां गृहीतसङ्केतज्ञानस्यैव अर्थप्रतीतिजनकत्वेन सङ्केतग्रहसहाय एव शब्दोऽर्थविशेषं प्रतिपादयति। अतो यस्य शब्दस्य यस्मिन्नर्थेऽव्यवधानेन सङ्केतग्रहो ज्ञाने उपयुज्यते सः शब्दः तस्यार्थस्य वाचक इत्युच्यते। अस्यार्थः सङ्केतः शब्दार्थयोः वाच्य - वाचकभवरूपसम्बन्धस्य अवधारणं करोति। अयं सङ्केतः यस्य कृतः सः सङ्केतितः। सोऽसौ सङ्केतितार्थः जातिगुणक्रियाद्रव्यात्मकेन चतुर्विधो भवति। तत्रापि केवलजातिः, जात्यालिङ्गितव्यक्तिः अन्यापोहो वेति मतभेदाः। एवं सङ्केतविषयीभूतार्थस्य विषयरूपः व्यापारोऽभिधेति। सा द्विविधा - रूढिपूर्विका, योगपूर्विका चेति।

**रूढिपूर्विका अभिधा** - रूढार्थप्रतिपादिका इति रूढिपूर्विका। रूढिः अश्वकर्णादिवद् अवयवार्थभावेन समुदायप्रसिद्धिः। यथा -

**तपोविशेषैः प्रथितैः प्रजानां शुभैश्चरित्रैर्जगती महिष्याः।**
**भाग्यैः प्रभूतैर्भुवनस्य चास्य बिभर्ति राज्यं वरवीररुद्रः।।**

अत्र सर्वे शब्दाः रूढाः वा प्रसिद्धाः वेति।

प्रजानां तपोविशेषैः, जगतीमहिष्याः नाम भूकान्तायाः शुभैश्चरित्रैः, भुवनस्य नाम मध्यमलोकस्य प्रभूतैः भाग्यैः असौ वरश्रेष्ठः वीररुद्रः राज्यं बिभर्ति। अतः तपः प्रभृतिनिमित्तभेदात् विच्छित्तिविशेषं वक्तुं समर्थोऽस्ति। प्रजायाः अर्थः जनसमुदायः इति। एषा प्रजा समष्टिः, पृथिवी राज्ञः महिषी इत्यस्मात् व्यष्टिः। तेन हि समष्टिव्यष्टिभ्यामाश्रितः भुवनशब्दः मध्यमलोकवाचकः न तु त्रिभुवनवाचकः। तपः, प्रजाः, चरित्रं, जगती, भुवनं तथा च भाग्यमित्यादयः रूढार्थप्रतिपादकाः शब्दाः। अतः रूढिपूर्विका अभिधा इत्यत्र।

**योगपूर्विका अभिधा** - योगकारणात् नाम संयोगमाध्यमेन अर्थापत्तिः यत्र तत्रैव योगपूर्विका अभिधेति। यथा -

**राज्ञि रुद्रनराधीशे रञ्जयत्यखिलाः प्रजाः।**
**भूरन्वर्था वसुमती रत्नगर्भा स्थिरेति च।।**

रुद्रनराधीशः यदा राजा समभवत् तदा सम्पूर्णप्रज्ञा आनन्दिता। अपि च वसुमती, रत्नगर्भा, स्थिरा तथा च भूः इत्यादयः शब्दाः अन्वर्थाः सञ्जाताः।

अत्र वसुमत्यादिशब्दानां धनवत्ताद्यवयवार्थसद्भावात् यौगिकत्वमिति। वसुमती इत्युक्ते धनवती। रत्नगर्भा नाम रत्नान्यैव यस्याः गर्भे सन्ति सा। यद्यपि पर्वतसमुद्रादीनां भारेण भारयुक्ता तथापि अचला नाम स्थिरा सा। भूः सस्याद्योत्पादिकेति। अत्र राज्ञः योगेन इमेऽर्थाः यौगिकाः समभवन् ।

**स्वावलोकनप्रश्नाः**

१. तिस्रः शब्दवृत्तयः काः ?

२. शब्दः कतिविधः ?

**स्वावलोकनप्रश्नाः**


३. अभिधाशब्दवृत्तेः लक्षणं किम् ?

४. रूढिपूर्विका योगपूर्विका चेति कस्याः शब्दवृत्तेः प्रकारद्वयम् ?

## २. लक्षणाशब्दवृत्तिः

लक्षणम् - वाच्यार्थानुपपत्त्या तत्सम्बन्धिन्यारोपितः शब्दव्यापारो लक्षणा। वाच्यार्थानुपपत्त्या नाम मुख्यार्थबाधेन, तत्सम्बन्धिनि इत्युक्ते मख्यार्थसम्बन्धविषये आरोपितः शब्दव्यापारः लक्षणेत्यर्थः। अन्यार्थप्रतिपत्तिहेतुः शब्दव्यापारो लक्षणा। अत्र स्वार्थप्रतीतेः अनन्तरं शब्दव्यापारः विरमति। उपरतव्यापारस्य शब्दस्य पुनः व्यापारान्तरायोगादर्थ एव लक्षकः इत्यर्थव्यापारो लक्षणा। अर्थात् अर्थ एव अन्यार्थलक्षकः न तु शब्दः। शब्दस्योपरि अन्यार्थारोप इति स्पष्टम् । सा सादृश्यनिबन्धना सम्बन्धनिबन्धना चेति द्विधा। सम्बन्धनिबन्धना जहद्वाच्या अजहद्वाच्या चेति द्विधा। सादृश्यनिबन्धना सारोपा साध्यवसाया चेति द्विधा। एवं लक्षणा चतुर्विधा।

**अवधेयांशः**



अधुना सम्बन्धनिबन्धना लक्षणां वयं पश्यामः। मुख्यार्थसम्बन्धानुगुणं सा द्विधा। तत्र प्रथमा जहल्लक्षणा इत्युक्ते जहद्वाच्या सम्बन्धनिबन्धना।

**१. जहल्लक्षणा** - स्वार्थपरित्यागपूर्वकपरार्थग्रहणं यत्र तत्रैव जहल्लक्षणा।

यथा - **जेतुः काकतिभूभर्तुराकर्ण्य पटहध्वनिम् ।**

**सामन्तनगराण्युच्चैराक्रोशन्ति समन्ततः।।**

विजेतुः काकतिनरेशस्य परटध्वनिमाकर्ण्य सामन्तनगराणि सर्वतः उच्चैः आक्रोशन्ति इत्यर्थः।

अत्र आक्रोशसिद्ध्यर्थं नगरशब्दः स्वार्थं हित्वा तद्वासिनः प्राणिनः लक्षयतीत्येषा जहल्लक्षणा। यतो ह्यचेतनं नगरम् आक्रोशं कर्तुं नैव प्रभवति।

**२. अजहल्लक्षणा** - स्वार्थस्य अपरित्यागेन परार्थोपस्थापनमत्र विधीयते।

यथा - **पत्युः काकतिनाथस्य पादपीठीमनारतम् ।**

**स्फुरद्रत्नप्रभाजालैरलङ्कुर्वन्ति मौलयः।।**

**अयमत्रार्थः** - वीररुद्रस्य आश्रयभूतानां नृपतीनां स्फुरद्रत्नप्रभाजालैः युक्ताः मौलयः काकतिनाथस्य पादपीठम् अनारतं नाम सततम् अलङ्कुर्वन्ति।

अत्रापि स्वार्थं हित्वैव तद्विशिष्टार्थान्तरं प्रतीयते। अलङ्कारसिद्ध्यर्थमत्र मौलिभिस्तदाश्रयभूताः नृपतयः लक्ष्यन्ते। यतो हि मौलय अचेतनाः। तेषामलङ्कारक्रियायाम् अन्वयासम्भव इति मुख्यार्थबाधः। मौलिसहिताः नृपादयः। अनेन मुख्यार्थयोगो दर्शितः। अपि च लक्षणया नृपाः आक्षिप्ता अतः अजहल्लक्षणा। सम्प्रति सादृश्यनिबन्धनालक्षणां वयमवलोकयामः।

यत्र आरोप्यमाणविषयः तथा च प्रस्तुतविषयः द्वयोः साम्यमनुलक्ष्य लक्षणा सा सादृश्यनिबन्धनेति। सा च द्विधा। तत्र प्रथमा सारोपेति विविच्यते।

**१. सारोपालक्षणा** - विषयविषयिणोरभिहितयोरभेदप्रतिपत्तिरारोपः।

विषयं नाम प्रस्तुतविषयः आरोपस्याश्रयो वा । विषयी इत्युक्ते आरोप्यमाणविषयः। एवं विषयविषयिणोः अभेदप्रतीतिः यत्र समानाधिकरण्येन निर्दिश्यते तत्र सारोपा लक्षणा। समानविभक्तिकपदाभ्यां सप्रयोजनमुपस्थाप्यते सारोपा। आरोपेण सह वर्तते इति सारोपा।

यथा - **मन्थानाचलमूलमेचकुशिलासंघट्टनश्यामिका-**
**कारं यत्तुहिनद्युतौ स्फुरति तत् सारङ्गमाचक्षते।**
**मन्ये नन्विह वीररुद्रनृपतेः कीर्तिश्रिया निर्जित-**
**स्तन्मुद्राङ्कवराहमिन्दुरुरसा बिभ्रत् सभृज्जृम्भते।।**

अस्यार्थोऽयम् - मन्थानाचलस्य मूलोपलेषु संघर्षणेन या श्यामिका (कालिमा) चन्द्रे दृश्यते सा सारङ्ग इति सम्बोध्यते। किन्तु अहं मन्ये यदयं चन्द्रः वीररुद्रनृपतेः कीर्तिश्रिया पराजितस्सन् पराभवचिह्नमेव वराहरूपेण उरसि धारयतीति।

अत्र कुरङ्गस्य वराहात्मकत्वं प्रदर्शितम् । लोके केनचिज्जितः तन्मुद्राम् उरसा बिभर्तीति प्रसिद्धिः। अत्रापि काकतीश्वरस्य वराहध्वजत्वात् पराभूतचन्द्रस्य उरसि वराहमुद्रेतित्यर्थः। वराहस्यारोपणं वर्णसाम्यात् सारङ्गे कृतमस्ति अपि च द्वयोः अभेदप्रतीतिः वीररुद्रनृपतेः वीरत्वप्रयोजनेन समुपस्थापिता। अतः सारोपेति।

**२. साध्यवसायलक्षणा** - विषयनिगरणेनाभेदप्रतिपत्तिरध्यवसायः। यत्र विषयिणा आरोप्यमाणेन विषयस्य निगरणं नाम विषयगोपनं कृत्वा अभेदप्रतीतिः तत्र साध्यवसायलक्षणा। विषयिवाचकपदेनैव विषयप्रतिपादनम् अध्यवसानम् । विषयनिष्ठासाधारणधर्मप्रतिपत्त्यसहकृतानि अस्य अन्यतादात्म्यप्रतीतिः सा साध्यवसायलक्षणा। अत्र विषयिणः सामर्थ्यं तादात्म्यप्रतीतेः कृते अपेक्ष्यते।

यथा - **काकतीयकुलाम्भोधेः प्रभवत्येष चन्द्रमाः।**

**कृतः कुवलयोल्लासो येनोदयमुपेयुषा।।**

**अस्यार्थः** - काकतीयकुलरूपसमुद्रात् चन्द्रोदयः भवति। येन पूर्वपर्वतं प्राप्तवता कुवलयोल्लासः नाम भूमण्डलस्य अभ्युदयः कारितः।

अत्र प्रतापरुद्रस्य चन्द्रत्वरूपेण अध्यवसायः तथा च काकतीयकुले समुद्रारोपः निर्दिष्टः। विषयः प्रतापरुद्रः विषयिणा चन्द्रेण पूर्णतः निगीर्णः। चन्द्रमाः तथा च प्रतापरुद्रः द्वयोर्मध्ये भूमण्डलस्य अभ्युदय इति साधारणधर्मः। किन्तु चन्द्रमा इत्येतच्छब्देन चन्द्र एव पूरोवर्त्यभेदाध्यवसायेन विशिष्यते न तु राजा। अतः साध्यवसायलक्षणात्र।

**स्वावलोकनप्रश्नाः**

१. लक्षणाशब्दव्यापारः कुतः सम्भवति?

२. ग्रन्थकारेण लक्षणायाः कति प्रकाराः व्यपदिष्टाः?

३. विषयनिगरणेन अभेदप्रतीतिः कुत्र विद्यते?

४. सादृश्यनिबन्धना कति विधा?

**तात्पर्यार्थस्य व्यङ्ग्यार्थे अन्तर्भावः**

तात्पर्यार्थोऽपि व्यङ्ग्यार्थः एव, न पुनः पृथग्भूतः इति प्रतिपाद्य व्यङ्ग्यार्थे एव तात्पर्यार्थस्य अन्तर्भावं करोति ग्रन्थकारः। कथमिति अत्रोच्यते -

अत्र वक्तृबुद्धिसन्निधापितो वाक्यावगम्यो वाक्यार्थो रसादिरूपः तच्छब्देनोच्यते। तस्मिन् पराः, तत्पराः, तदासक्ताः, तद्विषया इत्यर्थः। तेषां भावः तात्पर्यमिति। अपि च मीमांसकमतमेवमस्ति - अभिहितानां पदार्थानाम् अर्थाभिधायिनां वा पदानां विशिष्टार्थप्रत्यायनशक्तिः तात्पर्यमिति तदा व्यङ्ग्येऽन्तर्भावः न युज्यते।

अत्रोत्तरति - केवलं तावदेव अर्थप्रतिपादने न कविसंरम्भविश्रान्तिः। काव्यशब्दानाम् अन्वयव्यतिरेकाभ्यां प्रवृत्तिनिवृत्तिविषयभूतस्य प्रधानस्य प्रयोजनम् अन्यतरं नैव सम्भवति। किन्तु तदर्थन्यक्कारेण प्रतीयमाने सामाजिकानन्दास्वादफले रसादिकारणम् । अतः सः रसः एव तात्पर्यार्थः। तथैव तस्य प्रत्यायकः पदार्थशक्तिरेव तात्पर्यम् । इयं पदार्थशक्तिः नाभिधा स्वार्थसङ्केताभावात्। नापि लक्षणा मुख्यार्थबाधाद्यभावात् । अतः वक्ष्यमाणलक्षणस्य व्यञ्जनस्यैवेदं नामान्तरकरणमिति तदर्थस्य व्यङ्ग्यार्थत्वमेवेति स्पष्टम् ।

**लक्षणान्तर्भूता गौणीवृत्तिः** - 'गौणवृत्तिरपि लक्षणाप्रभेद एव, सम्बन्धानुपपत्तिमूलकत्वात्' इति प्रतिपाद्य ग्रन्थकारः प्राभाकराणां मतं खण्डयति। गौणवृत्तिः लक्षणातः भिन्नेति प्राभाकराः इति प्रसिद्धम् ।

अत्र निरूपयति ग्रन्थकारः यत् गुणनिमित्ता वृत्तिः गौणवृत्तिरित्यर्थः। तदर्थं हेतुः सम्बन्धः। मुख्यार्थयोगः सम्बन्धः। तद्बाधोऽनुपपत्तिः। यथा अग्निर्माणवक इत्यत्र अग्निसादृश्यविशिष्टा माणवकप्रतिपत्तिः विवक्षिता। यतोहि अग्निलक्षिततापकत्वादि गुणसादृश्ययोगसम्बन्धः अत्र। सादृश्यात् तु मता गौणी। सादृश्येतरसम्बन्धात् शुद्धा लक्षणा।

तथैव गङ्गायां घोषः इत्यत्र गङ्गासामीप्यसम्बन्धविशिष्टतीरप्रतिपत्तिः विवक्षिता। गङ्गासम्बन्धस्य उपलक्षणत्वे घोषगतपवित्रत्वाद्यसिद्धेः। अत्र कारणमिदं गङ्गाशब्दबोध्यत्वहेतुकप्रवाहात्म-कत्वप्रतीतिविषयत्वमेव तीरस्यापि गङ्गासम्बन्धविशिष्टत्वम् । एवं च प्रवाहस्तीरयोः एकशब्दबोध्य-त्वेन तादात्म्यप्रतीतेः प्रवाहधर्माः वा स्रोतो धर्मा वा अत्यन्तपावनत्वादयः तीरे प्रतीयन्ते इति प्रयोजनसिद्धिः। एवमनङ्गीकारे तदसिद्धिरेव बाधिका भवति। नेदं समुद्रादितीरं किन्तु गङ्गातीरमिति गङ्गासम्बन्धमात्रप्रतीतिः इत्यर्थः। घोषगतेति तीरे तिष्ठतीत्यर्थः। गङ्गातीरे घोषः इति मुख्यशब्दाभिधानात् लक्षणायाः सः भेदः न भवेदिति सत्यम् । परं गङ्गायां घोषः इत्यत्र प्रयोजनसिद्धिं ज्ञापयितुं लक्षणा प्रयुज्यते। अपि च सम्बन्धयोगः मुख्यकारणम् । एवं सम्बन्धयोगेन लक्षणा द्विधा विभज्यते। गौणीवृत्तिः इत्यत्रापि तादृशसम्बन्धः प्रतीयते। तस्मात् लक्षणायाः भेदः इत्युच्यते।

इत्थं ग्रन्थकारेण तात्पर्यार्थस्य अन्तर्भावं व्यञ्जनायां तथा च गौणीवृत्तेः अन्तर्भावं लक्षणायां विधाय अभिधालक्षणाव्यञ्जनेति तिस्रः शब्दवृत्तयः निगदिताः।

**स्वावलोकनप्रश्नाः**

१. ग्रन्थकारः तात्पर्यार्थस्य कुत्र अन्तर्भावं कृतवान् ?

२. गौणीवृत्तिः कस्याः प्रभेदः?

३. अग्निर्माणवकयोः कीदृशः सम्बन्धः?

**व्यञ्जनावृत्तिः - लक्षणम्**

अन्वितेषु पदार्थेषु वाक्यार्थोपस्कारार्थान्तरविषयः शब्दव्यापारो व्यञ्जनावृत्तिः। अन्वितेषु (आङ्काक्षा - योग्यता - सन्निधिवशात् सम्बन्धेषु) पदार्थेषु (पदैरभिहितेषु) वाक्यार्थोपस्कारार्थम् (काव्यशरीरभूतस्य शोभार्थम् ) अर्थान्तरविषयः (वाच्यलक्ष्याभ्यामन्योऽर्थविषयः) शब्दव्यापारः व्यञ्जनावृत्तिरिति। वाच्यलक्ष्यार्थौ परित्यज्य अन्यार्थप्रतीतिः यत्र तत्रैव व्यञ्जनावृत्तेः साम्राज्यमिति। सा त्रिविधेति।

**व्यञ्जनावृत्तिः**

शब्दशक्तिमूला अर्थशक्तिमूला उभयशक्तिमूला

**१. शब्दशक्तिमूला** - यत्रानेकार्थस्य शब्दस्य अर्थप्रकरणादिभिः अप्रकृतार्थवाचकत्वे निवारितेऽपि तत्प्रतीतिर्यत्प्रसादलब्धा सा शब्दशक्तिमूला।

अर्थः प्रयोजनम् । प्रकरणं प्रस्तावः। आदिग्रहणात् अर्थनिर्णायकाः संयोगादयोः गृह्यन्ते। तदुक्तं वाक्यपदीये - ' संयोगो प्रियोगश्च साहचर्यं विरोधिता। अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः। सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः। शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः'। इति । एतैः कारणैः अभिधार्थः निवारितः भवति।

यथा - **वाहिन्यः काकतीन्द्रस्य सर्वतोमुखसंभ्रमाः।**
**कुर्वन्त्युद्यत्कबन्धाढ्यं प्रतिपक्षबलार्णवम् ।।**

**अस्यार्थः** - सर्वत्र भ्रमणं क्रियमाणाः काकतीन्द्रस्य वाहिन्यः शत्रुसेनारूपसागरम् उद्यत्कबन्धाढ्यं कुर्वन्ति।

अत्र हि वाहिनीशब्दः सैन्यार्थवाचकः, सर्वतोमुखशब्दः सर्वव्यापकत्ववाचकः, कबन्धशब्दः मस्तकविरहितदेहार्थवाचकश्चास्ति। परमार्थप्रकरणादिना सैन्यसर्वव्यापित्वलूनमस्तकदेहपराणां वाचकत्वे नियन्त्रितेऽपि शब्दशक्तिमूला नदीजलप्रतिपत्तिः ततः जायते। प्राकरणिकार्थपर्यवसिताभिधा न शक्नोति अप्राकरणिकार्थप्रतिपत्तिं कर्तुम् । अतः अप्राकरणिकार्थस्यापि वाक्यशोभार्थं कथनमावश्यकमेव। अन्यतः तदर्थप्रतीतिः नैव शक्या। अतः व्यञ्जनाख्यं शब्दस्यैव व्यापारानन्तरं कल्प्यते। नात्र लक्षणावृत्तिः सम्भवति, वाच्यानुपपत्यभावात्। नात्र व्यापारद्वयेन अर्थप्रतिपादने वाक्यभेदः। यतो हि लौकिकवाक्यमिदं न वैदिकवाक्यम् । प्रयोक्तुः विवक्षापरतन्त्रत्वात् नास्ति तत्र दोषः।

**२. अर्थशक्तिमूला** - वक्तृबोद्धव्यादिवशात् सहृदयानाम् अर्थान्तरप्रतीतिहेतुः वाच्याद्यर्थ-व्यापारोऽर्थशक्तिमूला। यथा -

**श्रुत्वा काकतिभूभर्तुः क्षोणीपाणिग्रहोत्सवम् ।**
**अङ्गुष्ठेनालिखन्भूपाः पादपीठींनताननाः।।**

अत्र हि काकतिभूमिपतेः क्षोण्या (पृथिव्या) सह पाणीग्रहणोत्सवं श्रुत्वा नताननाः भूपाः अङ्गुष्ठेन पादपीठीम् आलिखन् स्थिताः इति।

भूपा विषण्णा इत्यर्थशक्तिबलाद् व्यञ्जते। न चार्थशक्तिमूले व्यञ्जने अनुमानशङ्का स्वीकार्या व्यङ्ग्यव्यञ्जकयोः अविनाभावस्य अभावात् । अत्र नताननत्वादेः अनुभावस्य अनेककारणकत्वसम्भावनया झटिति कारणविशेषाप्रतीतौ वीररुद्रविभोः धरणीपरिणयश्रवणानुसारेण विषाद एवार्थः।

**३. उभयशक्तिमूला ;-** शब्दार्थयोःउभयोः सम्बन्धे उभयशक्तिमूला। **यथा -**

**विजितारिपुरो मूर्तौ विलसत्सर्वमङ्गलः।**
**राजमौलिरसौ भाति रुद्रदेवो जगत्पतिः।।**

अरिपुरं येन जीतम् । यस्य मूर्तिः मङ्गला नाम कल्यामूर्तिरस्ति। राज्ञां शिरोमणिरसौ जगत्पतिः रुद्रदेवः शोभते।

अत्र विजितारिपुर इत्यर्थशक्तिमूलत्वम् , विलसत्सर्वमङ्गलो राजमौलिरिति शब्दशक्तिमूलत्वम् इति उभयशक्तिमूला व्यञ्जनावृत्तिरत्र। अत्र प्रतापरुद्रशङ्करयोरुपमालङ्कारध्वनिः। विजितारिपुरः इत्यत्र अर्थशक्त्या त्रिपुरान्तकः इत्यर्थः। विलसत्सर्वमङ्गलः इत्यत्र शब्दशक्तिमूलया पार्वतीपरिच्छिन्नार्धदेह इत्यर्थः। एवमुभयशक्तिमूला व्यञ्जनावृत्तिरत्र प्रतीयते।

**स्वावलोकनप्रश्नाः**

१. व्यञ्जनावृत्तेः लक्षणं लिखत।

२. व्यञ्जनावृत्तिः कतिविधा?

३. विजितारिपुरो......इत्ययं श्लोकः कस्मिन् विषये उद्धृतः?

४. वक्तृबोद्धव्यादिवशात् अर्थान्तरप्रतीतिहेतुः का शक्तिः स्वीकार्या?

**२२.३. कैशिक्यादिवृत्तयः** - शब्दवृत्तिनिरूपणानन्तरं कैशिक्यादिवृत्तयः निर्दिश्यन्ते। कैशिक्यारभटी सात्वती भारती चेति रचनाश्रितत्वेन रसावस्थानसूचकाः चतस्रो वृत्तयः। तथा चोक्तं दशरूपके-

**कैशिक्यारभटी चैव सात्वती भारती तथा।**
**चतस्रो वृत्तयो ज्ञेया रसावस्थानसूचकाः।।इति।**

अथ कैशिक्यादीनां स्वरूपं निगद्यते।

**१. कैशिकी लक्षणम्** 'अत्यर्थसुकुमारार्थसन्दर्भा कैशिकी' मता। अतिसुकुमारार्थसन्दर्भा इत्युक्ते अतीव सुकुमारार्थरचना एव कैशिकीति। तेन हि 'अत्यन्तसुकुमारौ द्वौ श्रृङ्गारकरुणौ मतौ।' इत्युक्त्वा यत्र श्रृङ्गारकरुणौ अतिकोमलेन सन्दर्भेण वर्ण्येते तत्र कैशिकीवृत्तिः।

यथा - **जितमदनविलासं काकतीयान्वयेन्दुं**
**नरपतिमनिमेषं द्रष्टुमाशंसिनीनाम् ।**
**सपदि विरचितासीदङ्गनानामपाङ्गै-**
**र्दिवि कुवलयदामश्यामला तोरणश्रीः।।**

**अत्रायमेवार्थः** - मदनविलासं विजित्य काकतीयवंशे उद्भूतं चन्द्रस्वरूपं रुद्रदेवं निर्निमेषं द्रष्टुमिच्छुकानाम् अङ्गनानाम् अपाङ्गै इत्युक्ते नेत्रकटाक्षैः आकाशे शीघ्रमेव कुवलयमाला इव श्यामलतोरणश्रीः विरचितेति।

जितमनदविलासम् इत्यनेन सूचितः लोकोत्तररूपयौवनाद्युद्दीपनविभावः। नरपतिमङ्गनानामिति चालम्बनविभावः वर्तते अत्र। अनिमेषं द्रष्टुमाशंसिनीनां कामिनीनाम् इति औत्सुक्यादिव्यभिचारिभावः संकीर्तितः। दिवि कुवलयेत्युपमाभूषितः अपाङ्गरित्यनुभावश्च संसूचितः। तस्मात् असंयुक्तकोमलवर्णसन्दर्भसहकृताः कैशिकीवृत्तिरत्र। अपि च रससार्वभौमः श्रृङ्गाररसप्रतीतिः।

**२. आरभटी लक्षणम्** - अत्युद्धतार्थसन्दर्भा वृत्तिरारभटी स्मृता। अत्युद्धतार्थसहिता रचना यत्र तत्रैव आरभटीवृत्तिः। सा रौद्रबीभत्सरसाभ्यां प्रतिपादिता भवति। यतः 'अत्युद्धतरसौ रौद्रबीभत्सौ परिकीर्तितौ' इति।

**यथा - खड्गाघातनिकृत्तशत्रवशिरोनिष्ठयूतरक्तच्छटा -**
**ज्वालैरुद्भटशस्त्रघट्टनभवत्स्फारस्फुलिङ्गोत्करैः।**
**स्त्यानासृक्पिशितास्थिखण्डविकटस्थूलोज्ज्वलाङ्गारकै-**
**रुच्चण्डश्चलमर्तिगण्डनृपतेः क्रोधाग्निरायोधने।।**

अत्र खड्गाघातैः शत्रूणां छिन्नमस्तकात् रक्तधारा प्रवहति। एताभ्यः रक्तधारारूपज्वालाभ्यः उद्भटशस्त्राणां परस्परघट्टनेन स्फुलिङ्गाः उद्भूताः। ते स्फुलिङ्गा अग्निकणसमूहाः इव घनीभूताः। असृक् येषां पिशितास्थिखण्डानां विकटस्थूलोज्ज्वलाङ्गारकैः चलमर्तिगण्डनृपतेः क्रोधाग्निः युद्धे चण्डरूपं धारयति।

अत्र चलमर्तिगण्डेति शौर्यातिशयसूचकं बिरुदनाम। खड्गादिशस्त्रोल्लासादिसूचितः रौद्ररसः रक्तमांसादिसूचितो बीभत्सश्च परस्परं प्रधानोपसर्जनभावापन्नौ अत्र। परुषवर्णविकटबन्धेन तौ द्वौ प्रतिपाद्येते श्लोकेऽस्मिन् । आरभटीवृत्तिः।

**३. भारती लक्षणम्** - ईषन्मृद्वर्थसन्दर्भा भारतीवृत्तिरिष्यते। यत्र ईषद् कोमलार्था रचना तत्र भारतीवृत्तिः। रसेषु हास्यशान्ताद्भुताः किञ्चित् सुकुमाराः प्रकीर्तिताः। अतः यत्र नातिसुकुमारा हास्यशान्ताद्भुता नातिसुकुमारेण सन्दर्भेण संग्रथ्यन्ते तत्र भारती।

**यथा - औन्नत्यं महदन्यदेव महितः कोऽप्येष गम्भीरिमा**
**काप्यन्या सरणिः प्रतापयशसोरन्यैव बाह्वोः प्रथा।**
**सर्वं नूतनमेव रुद्रनृपतेर्जाने न तन्निर्मितौ**
**सामग्री चतुराननेन कियती कीदृक् क्व वा कल्पिता।।**

**अस्यार्थः -** वीररुद्रदेवस्यसर्वातिशायित्वम् औन्नत्यं किमपि वैशिष्ट्यं भजते। अस्य अनिर्वचनीयमाहात्म्येन सम्पन्नं गाम्भीर्यं विशेषतः शोभते। प्रतापयशसोः सरणि अपि कापि अन्या एव। बाह्वोः शौर्यप्रसिद्धिस्तु सर्वान् वीरान् अतिशेते अस्य तात्पर्यं रुद्रनृपतेः सर्वं नूतनमेवास्ति। अस्य निर्मितौ विधात्रा कीदृक् वा कुतः वा कियती वा सामग्री कल्पिता स्यादिति न जाने।

अत्र सर्वत्र यथाक्रमं किमन्यशब्दौ अनिर्वचनीयत्वलोकोत्तरत्वप्रतिपादकौ। अतः रुद्रनृपतेः सम्बन्धितं सर्वमौन्नत्यादिकं नूतनमेव प्रतिभाति।

संयुक्तमृदुवर्णबन्धेन अद्भुतरसप्रतीतिरत्र। अतः भारतीवृत्तिः।

**४. सात्वती लक्षणम्** - ईषत्प्रौढार्थसन्दर्भा सात्वती वृत्तिरिष्यते।

यत्र ईषत् प्रौढरूपार्थरचना तत्र सात्वतीवृत्तिः। रसेषु वीरभयानकौ रसौ ईषत्प्रौढौ समाख्यातौ। तस्मात् यत्र नातिप्रौढौ वीरभयानकौ नातिप्रौढेन सन्दर्भेण निर्वाह्यते तत्र सात्वतीति।

**यथा - दूरादाकर्ण्य विश्वप्रसृमरमहसो वीररुद्रस्य जैत्र-**

**प्रस्थानारम्भभेरीविनदमरिनृपाः पूर्णकर्णज्वरार्ताः।**

**आसह्याद्रीन् विशन्तो गहनमतिमहत्कण्टकाकृष्टकेशा -**

**स्त्रायध्वं मुञ्चतेति प्रतिनृपतिधिया पादपान् प्रार्थयन्ते।।**

**अत्रायमर्थः** - यस्य प्रभावः विश्वे प्रसृतः तस्य वीररुद्रदेवस्य दिग्विजयारम्भे भेरीनिनादाः सञ्जाताः। तान् दूरादाकर्ण्य एव शत्रवः कर्णपूर्णज्वरार्ताः। अतः ततः पलाय्य दूरदेशं गन्तुकामाः ते पर्वतारोहणं विधाय वनं प्रविष्टाः। तत्रापि कीर्तितवृक्षाणां महत्कण्टकैः तेषां केशा आकृष्टाः। तस्मिन्समये इमे वृक्षा अपि वीररुद्रदेवस्यैव मित्राणि इति विचिन्त्य त्रायध्वं मुञ्चतेति तान् पादपान् ते प्रार्थितवन्तः।

अत्र परुषबहुलवर्णरचनाकारणात् भयानकरसप्रतिपादनात् सात्वती। अथ मतान्तरानुसारेण सर्वरससाधारणं वृत्तिद्वयं मध्यमारभटी मध्यमकैशिकी चेति।

**मृद्वर्थेऽप्यनतिप्रौढबन्धा मध्यमकैशिकी इति।**

श्रृङ्गारकरुणयोः अतिसुकुमारयोः अल्पप्रौढत्वं न तु अतिप्रौढत्वं यत्र भवति तत्र मध्यमकौशिकीवृत्तिः।

**यथा - आसन्नेऽपि महोत्सवे कथमितस्त्यक्त्वा प्रवासं व्रजे -**

**धिक् - धिक् साहसमावयोर्विघटनं को वा विधिः काङ्क्षति।**

**इत्थं स्वप्ननिवारित प्रियतम प्रस्थानबुद्धिस्ततो**

**बुद्ध्वा मूर्च्छति काकतीयनृपते त्वद्वैरिनारीजनः।।**

महोत्सवे आसन्नेऽपि त्यक्त्वा इतः कथं प्रवासार्थं गच्छति। को वा विधिः आवयोर्विघटनं काङ्क्षति? तस्य साहसं धिक्कारजनकम् । हे काकतीयभूप ! एवं स्वप्ने प्रियकरस्य प्रस्थानबुद्धिनिवारकः तव वैरिनारीजनः बुद्ध्वा पुनः मूर्च्छति।

अत्र ईषत्प्रौढरचनया श्रृङ्गारसङ्कीर्णः करुणरसः प्रतिपाद्यते।

तथैव 'मध्यमारभटी प्रौढेऽप्यर्थे नातिमृदुक्रमा'। अतिप्रौढयोरपि रौद्रबीभत्सयोः ईषत्मृदुबन्धः यत्र वर्तते तत्र मध्यमारभटी। यथा -

**मांसकीकससङ्कीर्णाः प्रसरद्रुधिरापगाः।**

**वसाकर्दमिता युद्धे भुवोऽन्ध्रसुभटैः कृताः।।**

युद्धे आन्ध्रनृपतेः सैन्यैः शत्रुभूमिः मांसकीकसैराकीर्णाः। तथैव रुधिरनदी अपि प्रवाहिता। न तावदेव सा भूमिः वसाकर्दमिता कृता। अत्र ईषत् मृदुसन्दर्भेण बीभत्सः प्रतिपाद्यते।

इत्थं कैशिक्यादिवृत्तयः ग्रन्थकारेण विवेचिताः।

**स्वावलोकनप्रश्नाः**

१. कौ द्वौ अत्यन्तसुकुमारौ रसौ ?

२. काव्यवृत्तीनां सङ्ख्या कति ?

३. आरभटीवृत्तिः कुत्र सम्भाव्यते ?

४. भारतीवृत्तेः वैशिष्ट्यं किम् ?

५. ईषत्प्रौढौ कौ रसौ समाख्यातौ ?

६. सर्वरससाधारणं वृत्तिद्वयं लिखत।

**इदमवधेयम्**

| | | रसः | विशेषः |
|---|---|---|---|
| वृत्तिः | कैशिकी → | श्रृङ्गारकरुणौ → | अतिसुकुमारार्थसन्दर्भा |
| | आरभटी → | रौद्रबीभत्सौ → | अत्युद्धतार्थसन्दर्भा |
| | भारती → | हास्यशान्ताद्भुताः → | ईषद् मृद्वर्थसन्दर्भा |
| | सात्वती → | वीरभयानकौ → | ईषत्प्रौढार्थसन्दर्भा |

## २.२.४. रीतयः

वैदर्भ्यादिरीतीनां शब्दगुणाश्रितानाम् अर्थविशेषनिरपेक्षतया केवलं सन्दर्भसौकुमार्यप्रौढत्वमात्रविषयत्वात् कैशिक्यादिभ्योः भेदः। वैदर्भ्यादीनां रसाश्रितमाधुर्यादिशब्दधर्मपरत्वं परं कैशिक्यादीनां तु साक्षादेव रसव्यञ्जकत्वम् इति महान् भेदः। अथ रीतीनां स्वरूपमुदाहरणञ्चाधुना व्यपदिश्यते।

**लक्षणम् - रीतिर्नाम गुणाश्लिष्टपदसङ्घटना मता।**

गुणैराश्लिष्टा पदरचना रीतिः। माधुर्यौजःप्रसादादिविशिष्टपदरचनेत्यर्थः। तथैव रीणन्ति गच्छन्त्यस्यां गुणा इति, रीयते क्षरत्यस्यां वाङ्मधुधारेति वा रीतिः इति व्युत्पत्तिः। सा त्रिधा - वैदर्भी गौडी पाञ्चाली चेति। इदानीं क्रमशः स्वरूपमुच्यते।

**१. वैदर्भी लक्षणम्** -

> **बन्धपारुष्यरहिता शब्दकाठिन्यवर्जिता।**
> **नातिदीर्घसमासा च वैदर्भी रीतिरिष्यते।।**

बन्धपारुष्यरहिता इत्युक्ते दुःसन्धिकृता, शब्दकाठिन्यवर्जिता इत्यस्यार्थः परुषवर्णैर्वर्जिता, दीर्घसमासरहिता पदरचना वैदर्भीरीतिः।

**यथा - काकतीयनरेन्द्रस्य कीर्तिचन्दनार्चनम् ।**

**दिगङ्गना वितन्वन्ति वतंसीकृततद्गुणाः।।**

अर्थात् काकतीयनरेन्द्रस्य गुणैराकृष्टाः दिगङ्गनाः तस्य कीर्तिरूपचन्दनेन आत्मानमर्चयन्ति। अत्र हि कोमलवर्णाः अल्पसमासा अपि च मृदुरचना वर्तते। कीर्तिः इति उद्दीपनविभावेन आभिव्यक्तेः श्रृङ्गारे आह्लादकरूपमाधुर्यगुणः प्रतिपादितः। अतः वैदर्भीरीतिः।

**२. गौडी लक्षणम्** - **ओजः कान्तिगुणोपेता गौडीया रीतिरिष्यते।** स्पष्टमेव। ओजः शब्देन समासभूयस्त्वमुच्यते। कान्तिशब्देन चौद्भटपदत्वम् ।

**यथा - प्रचण्डतरदोर्दण्डखण्डितारातिमण्डलः।**

**बिभर्त्युर्वीधुरां गुर्वी प्रभवन्नन्ध्रभूपतिः।।**

भावार्थोऽयम् - अतिप्रचण्डभुजदण्डाभ्यां सम्पूर्णशत्रुमण्डलं खण्डितं कृत्वा आन्ध्रदेशस्य नरेशः प्रभुत्वं सम्पाद्य उर्वीधुरां नाम भूभारं निर्वहति।

अत्र पुरुषवर्णसन्दर्भेण समासभूयस्त्वेन च रौद्ररसगतदीपकत्वलक्षणौजः प्रतिपादनात् गौडीया।

**३. पाञ्चाली लक्षणम्** - **पाञ्चालीरीतिर्वैदर्भीगौडीरीत्युभयात्मिका।** वैदर्भी तथा च गौडी यत्र सम्भूय विद्यते तत्र पाञ्चालीरीतिः।

**यथा - स्थाने तच्चलमूर्तिगण्डननृपते त्वत्खड्गभोगी द्विषत्**

**प्राणैर्यत् परितोषमेति सततं किं त्वेतदत्यद्भुतम् ।**


**पीतेन प्रतिपक्षपार्थिवयशः क्षीरेण गौरत्विषं**

**यत् संवर्धयति त्रिलोकभरितां त्वत्कीर्तिलक्ष्मीसुधाम् ।।**

अस्य श्लोकस्यार्थः - हे चलमर्तिगण्डनृपते वीररुद्र तव खड्गरूपमहा.शत्रूणां प्राणऐः सन्तुष्टः भवतीत्यत्र किमद्भुतं विचित्रं वा? शुभ्रं प्रतिपक्षपार्थिवयशःक्षीरं पीत्वा त्रिलोकव्याप्ता तव कीर्तिः लक्ष्मीरूपामृतं संवर्धयति।

पयःपानं भुजङ्गानां केवलं विषवृद्धये इति लोकप्रसिद्धम् । परमत्र अधिकतरसुधाद्धय इति। उदाहरणेऽस्मिन् पूर्वोक्तरीतिसङ्कर्येण अद्भुतरसप्रतिपादनात् पाञ्चाली।

**अवधेयांशः**




स्वावलोकनप्रश्नाः

१. रीतेः व्युत्पत्तिं लिखत।

२. रीतिभेदान् कथयत।

३. ओजः शब्देन किं प्रतिपाद्यते

४. पाञ्चालीरीतेः को विशेषः

५. समासभूयस्त्वं कुत्र अन्तर्भवति

**१.२.५. शय्या - या पदानां परान्योन्यमैत्री शय्येति कथ्यते।**

या पदानां परा (उत्कृष्टा) अन्योन्या मैत्री इत्युक्ते विनिमयासहिष्णुत्वं सा शय्येति। यथा -

**दातुः काकतिवंशमण्डनमणोर्निस्सीमविश्राणन -**
**श्लाघालङ्घितकल्पपादपगुणप्रौढेरगाधौजसः।**
**बिभ्रच्छारदकौमुदीपरिमलं सामन्तसीमन्तिनी -**
**गण्डाभोगनिरूढपाण्डिमधुरां धत्ते यशः प्रायशः।।**

अपरिमितेन दानेन यस्य प्रशंसया कल्पतरोः गुणप्रौढेरुल्लङ्घनं विहितम् । एतादृशः अगाधौजसः वीररुद्रस्य शारदकौमुदीपरिमलधृतं यशः सामन्तसीमन्तिनीनां विस्तृतगण्डे निरूढं स्थित्वा पाण्डिमधुरां विधत्ते।

अत्र पदविनिमयासहिष्णुत्वाद् बन्धस्य पदानुगुण्यरूपा शय्या। अर्थात् अत्रत्यपदानि परस्परसहयोगेन तिष्ठन्ति। परस्परपरिवर्तनं न सहन्ते इति।

**२.६. द्राक्षादिपाकाः**

**अर्थगम्भीरिमा पाकः स द्विधा हृदयङ्गमः।**
**द्राक्षापाको नारिकेलपाकस्य प्रस्फुरान्तरौ।।**

हृदयानन्दस्य प्रदात्री अर्थगम्भीरिमा पाकः इति। अर्थगम्भीरिमा नाम अर्थस्य श्रृङ्गारादेः् आस्वाद्यमानताविशेषः। पाकोऽयं द्विधा। द्राक्षापाकः नारिकेलपाकश्चेति। द्वयोः भेदस्तु स्वयं स्फुटः। यथाक्रमं स्वरूपमुदाहरणं च -

**१. द्राक्षापाकः** - द्राक्षापाकः स कथितो बहिरन्तःस्फुरद्रसः।

यत्र रसः अन्तर्बहिश्च स्फुरतिं तत्र द्राक्षापाकः। लीलया रसास्वादः अत्र। प्रस्फुटरसप्रतीतिः अत्र। यथा -

**स्मरस्मेरान् मन्दस्मितमधुरसौरभ्यसुभगान्**

**मनाग्व्रीडाजाड्यान् प्रणयरसकल्लोलभरितान् ।**

**कृतानेकस्कन्धान् मनसिजसहस्राणि सृजतः**

**कटाक्षान् वामाक्षी किरति परितो रुद्रतपतिम् ।।**

मदनमन्थरत्वादिगुणशीलान् मन्दस्मितान् सन्तापहरान् सौरभ्येण सुभगान् मनाक् व्रीडाजाड्यान् प्रणयरसकल्लोलभरितान् प्रियदृष्टिप्रतिघातेन औत्सुक्यभरेण परिपूर्णान् समन्मथान् कटाक्षान् वामाक्षी मनोहरनयना रुद्रनपतिं परितः किरति। अत्र एवं सम्मर्दसहिष्णोः शृङ्गारस्य पठनसमयेऽपि आस्वाद्यमानत्वादन्तर्बहिश्च रसस्फुरणम् । तस्मात् द्राक्षापाकोऽत्र।

**२. नारिकेलपाकः** - स नारिकेलपाकः स्यादन्तर्गूढरसोदयः। अन्तर्गूढः नाम गहनार्थस्थितः रसोदयः यत्र सः नारिकेलपाकः। लीलया रसानुभूतिः नैव सम्भवति अत्र। अप्रस्फुटरसप्रतीतिः अस्य विशेषः। यथा -

**लीलाविभ्रमपूर्वरङ्गमुदितं तारुण्यमेत्य त्रपा-**

**नेपथ्यान्तरबिम्बितस्मरकलालास्यप्रपञ्चश्रियः।**

**सख्यः पश्यत काकतीयनृपतौ भावानुबन्धोज्ज्वलः**

**कोऽप्यस्यास्तरलभ्रुवो विजयते श्रृङ्गारनाय्यक्रमः।।**

लीलाविभ्रमा एव पूर्वरङ्गो यस्य तत् तारुण्यमेव रङ्गस्थलमस्ति। त्रपा नेपथ्यमिति। (नीहारावरणसदृशी यवनिका नेपथ्यम् )अतः एव तस्यान्तरे बिम्बिता स्मरकत्वा (कामोद्दीपनं) सैव लास्यप्रपञ्चश्रीः परिलक्ष्यते अत्र। सख्यः पश्यत तरलभ्रुवः अस्याः (नायिकायाः) काकतीयनृपतौ प्रेमभावानुबन्धेन मनोहरः कोऽपि अनिर्वचनीयः श्रृङ्गारनाट्यक्रमः विजयते (प्रचलति)

श्लोकेऽस्मिन् अर्थावगमनं शीघ्रं न जायते। तस्मात् रसानुभूतिः कविना अन्तर्गूढरसोदय अत्र अतः नारिकेलपाकः।

स्वावलोकनप्रश्नाः

१. काव्यशय्या इत्त्यस्य कोऽर्थः?

२. पाकस्य प्रकारद्वयं लिखत।

३. कस्मिन् पाके प्रस्फुटरसप्रतीतिः?

४. अन्तर्गूढरसोदयः कुत्र?

**इदमवधेयम्**

**पाकः**
- द्राक्षापाकः - बहिरन्तःस्फुरद्रसः
- नारिकेलपाकः - अन्तर्गूढरसोदयः

## २.२.७. काव्यभेदाः

काव्ये व्यङ्ग्यस्य प्राधान्यम् अप्राधान्यमधिकृत्य काव्यभेदाः निरूपितास्सन्ति। अर्थात् व्यङ्ग्यप्राधान्यस्फुटत्वं काव्यविशेषान् प्रतिपादयितुं कारणमिति। तेन हि काव्यं त्रिविधम् । अधोनिर्दिष्टाः काव्यप्रकाराः।

काव्यम्

ध्वनिकाव्यम् (उत्तमकाव्यम्) गुणीभूतव्यङ्ग्यम् (मध्यमकाव्यम्) चित्रकाव्यम् (अधमकाव्यम्)

सम्प्रति क्रमशः तेषां विवरणं क्रियते।

**१. ध्वनिकाव्यम्** - **व्यङ्ग्यप्राधान्ये उत्तमं काव्यं ध्वनिरिति व्यपदिश्यते।** व्यङ्ग्यार्थप्राधान्यं यत्र तदुत्तमकाव्यं ध्वनिरिति। व्यङ्ग्यस्य चारुत्वोत्कर्षः अत्र प्रतीयते। वाच्याद् अतिशायिनि अतिचमत्कारजनके ध्वनिकाव्यम् । व्यङ्ग्ये यथा -

**स्वामिन् गोत्रमहीधरान् किमधुना नीचैर्विधत्से कुतो**
**गाधानम्बूनिधीन् करोषि, कुरुषे किं दिक्पतीनल्पकान् ।**
**इत्थं पार्श्वचरानुलापमनिल त्यक्कृत्य घर्मैषिणा**
**दृष्टः पद्मभुवा गुणैकवसतिः श्रीवीररुद्रो नृपः।।**

**एवमर्थः** -

हे स्वामिन् पृथिवीधारकान् उन्नतमहीधरान् (पर्वतान्) किमर्थं नीचैः करोति। अगाधसमुद्रान् किमर्थं गाधान् (तलस्पर्शयुक्तान्) विदधाति? दिक्पतीनपि अल्पकान् किमर्थं कर्तुमिच्छति? एवं पार्श्वचराणाम् अनुलोपस्य (मुहुर्भाषणस्य) चिन्तां विहाय विधात्रा गुणैकवसतिः वीररुद्रः निर्मितः।

अत्र प्रतापरुद्रस्य कुलशैलातिशायिसमुन्नतत्वम् , अतिसमुद्रगाम्भीर्यं लोकपालाधिकमैश्वर्यञ्च ध्वन्यते। तथा कुलशैलपयोनिधिलोकपालनिर्माणसंरम्भातिशायि सर्वविलक्षणं काकतीयनिर्माणवैभवम् इति च व्यञ्जते। व्यङ्ग्यस्य प्राधान्यत्वादत्र ध्वनिकाव्यमिति।

**२. गुणीभूतव्यङ्ग्यकाव्यम् - व्यङ्ग्यस्य अप्राधान्ये मध्यमं गुणीभूतव्यङ्ग्यमिति।**

वाच्यादनतिशायिनि व्यङ्ग्ये गुणीभूतव्यङ्ग्यं वा मध्यमकाव्यम् । यथा -

**प्रत्यग्रप्रसरत्प्रतापविभवव्याप्त्याखिलाशान्तरे**
**विश्वत्रातरि वीररुद्रनृपतौ सिंहासनाध्यासिनि।**
**आस्थानीं समुपागतैर्नृपवरैस्तास्तास्तथा दर्शिता**
**श्चेष्टा याभिरमष्य काकतिविभोर्दृष्टिः कृपार्द्रीकृता।।**

**अस्यायमाशयः** - यस्य वर्धमानप्रतापविभवैः अखिलाशाजगत् व्याप्तम् । तादृशः विश्वत्राता वीररुद्रनृपतिः यदा सिंहासनाधिष्ठितः तदा शरणमुपगतैः नृपवरैः तास्ताः चेष्टाः दर्शिताः याभिः काकतिविभोः दृष्टिः कृपाद्रीकृता।

अत्र प्राप्ताभिषेकमहोत्सवस्य प्रतापरुद्रदेवमहाराजस्याग्रे शरणार्थिनां पार्थिवानां तथाविधकार्पण्योक्ति पुनःपुनःप्रणामादिकं व्यङ्ग्यं तास्ताश्चेष्टाः दर्शिता इति वाच्यादनतिशायि इति गुणीभूतव्यङ्ग्यता।

**३. चित्रकाव्यम् - व्यङ्ग्यस्य अस्फुटत्वेऽधमं काव्यं चित्रमिति।**

अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थरहितं चित्रकाव्यम् अभिधीयते। इदं चित्रं त्रिविधम् - शब्दचित्रमर्थचित्रमुभयचित्रं चेति।

**उभयचित्रम् - शब्दचित्रमर्थचित्राभ्याम् उभयचित्रम् ।**

**यथा - विद्यासमुद्रे भुवनैकभद्रे प्रतापरुद्रे जितवैरिमद्रे।**
**रक्षाविनिद्रे धृतशौर्यमुद्रे कान्तेव पृथ्वी रमते गुणार्द्रे।।**

विद्यारूपसमुद्रः, भुवनस्य एक एव कल्याणकारकः, शत्रूणां हर्षस्योपरि प्राप्तविजयः प्रजारक्षणार्थं विगतनिद्रः, शौर्यरूपमुद्राधारकः तथा च गुणार्द्रोऽयं प्रतापरुद्रः। अतः तस्मिन् कान्ता इव पृथिवी रमते। अत्रानुप्रासोपमाभ्याम् उभयचित्रकाव्यम् ।

**शब्दचित्रम् यथा -**

**क्षोणीरक्षणदक्षिणाः क्षतजगत्क्षोभा दुरीक्षक्रमाः**
**क्षुद्रक्षत्रियपक्षशिक्षणविधौ प्रोत्क्षिप्तकौक्षेयकाः।**
**उद्दामोद्यमनस्य रुद्रनृपतेर्दोर्दण्डयोश्चण्डयो-**
**र्गर्जद्गुर्जरगर्वपर्वताभिदादम्भोलयः केलयः।।**

कवेः वत्त्यनुप्रास एवाभिनिवेशात् शब्दचित्रमिदम् । दोर्दण्डक्रीडानाम् अशनित्वरूपणं गर्वाणां पर्वतत्वरूपणे हेतुः। उद्यमशीलस्य प्रतापरुद्रनृपतेः प्रचण्डभुजदण्डक्रीडाः क्षोणीरक्षणे (पृथिव्याः रक्षणे) समर्थाः, दुष्टदमनार्थं दुरीक्षक्रमाः (आयुधाः) क्षुद्रक्षत्रियाणां दण्डविधौ खड्गाः, अहङ्कङ्कारवाचालानां दुर्जनानां गर्वपर्वतभेदने वज्राः सन्ति।

**अर्थचित्रम् -**

**खड्गे युद्धविजृम्भिते रिपुमहीनाथाञ्जलिं बिम्बितं**
**प्रेक्षमाणाः जयलक्ष्मीवासकमलं मन्यन्ते विज्ञानिनः।**
**मन्ये वीरप्रतापरुद्रविभोर्जन्येषु ग्रहीतुं पुनः**
**सृष्ट्यै रिपुजीवितानि विधेः प्राप्तस्य पीठम्बुजम् ।।**

युद्धार्थं स्वीकृते प्रकाशमाने खड्गे प्रतिबिम्बितं रिपुनृणाञ्जलिं वीक्ष्य विज्ञानिनः जयलक्ष्मावासकमलं मन्यन्ते। किन्तु अहं मन्ये यत् वीररुद्रप्रभोः युद्धेषु सृष्ट्यै रिपुजीवितानि पुनः ग्रहीतुं विधेः इदं पीठाम्बुजमस्ति।

अत्र प्रतापरुद्रखड्गप्रतीतिबिम्बिते रिपुनृपाञ्जलौ जयलक्ष्मीवासकमलत्वमारोप्य तदपह्नवेनार्थसिद्धेन ब्रह्मासनकमलत्वप्रतिपादनात् अपह्नवालङ्कारः। कवेः अभिनिवेशात् अस्य अर्थचित्रत्वम् ।

## २.२.८. ध्वनिविशेषाः

ध्वनिकाव्यविशेषा अत्र निरूप्यन्ते। अत्र ध्वनेः लक्षमाभिधामूलत्वेन अविवक्षित-वाच्यविवक्षितान्यपरवाच्याख्यौ प्रथमं द्वौ भेदौ। अविवक्षितवाच्यस्य अर्थान्तरसङ्क्रमिता-त्यन्ततिरस्कृतवाच्यतया द्विविधस्य वाक्यपदगतत्वेन द्वैविध्ये चातुर्विध्यम् । विवक्षितान्यपरवाच्यस्य संलक्ष्यक्रमव्यङ्ग्यतयासंलक्ष्यक्रमव्यङ्ग्यतया द्वौ भेदौ। संलक्ष्यक्रमव्यङ्ग्ये शब्दशक्तिमूले वस्त्वलङ्काररूपतया द्वैविध्ये वाक्यपदगतत्वेन चातुर्विध्यम् । अर्थशक्तिमूले संलक्ष्यक्रमव्यङ्ग्येऽर्थस्य स्वतः सम्भवित्वेन कविप्रौढोक्तिसिद्धत्वेन कविनिबद्धोक्तिसिद्धत्वेन च त्रैविध्यम् । त्रिविधस्य वस्त्वलङ्काररूपतया द्वैविध्ये षड्विधत्वम्। षड्विधस्यापि व्यङ्ग्यव्यञ्जकतया द्वैविध्ये द्वादशविधत्वम्। द्वादशविधस्यापि प्रबन्धगतत्वेन वाक्यगतत्वेन पदगतत्वेन च त्रैविध्ये षट्त्रिंशत् प्रकारोऽर्थशक्तिमूलोऽनुरणनध्वनिः। उभयशक्तिमूलो वाक्यगतत्वेन एकविध एव। एवं संलक्ष्यक्रमव्यङ्ग्यध्वनेः एकचत्वारिंशत्भेदाः। असंलक्ष्यक्रमव्यङ्ग्यः रसादिध्वनिः प्रबन्धवाक्यपदैकदेशरचनावर्णगतत्वेन षड्विधः। एवं विवक्षितान्यपरवाच्यध्वनेः प्रथमं शुद्धा एकपञ्चाशद् भेदाः। तेषां प्रत्येकमेकस्यैकैकेन सम्बन्धे प्रथमभेदस्य एकपञ्चाशत् भेदाः। द्वितीयस्य पञ्चाशत् भेदः। अनेन क्रमेणोत्तरस्यैकैकभेदपरित्यागे षड्विंशत्युत्तरशतत्रयाधिकसहस्रसङ्ख्याकाः (१३१६) मिश्रभेदाः। अविवक्षितवाच्यस्य विवक्षितान्यपरवाच्यस्याविवक्षितवाच्यसम्बन्धे भेदो न पृथग्भूतः। अनेनैव क्रमेण वस्तुध्वनेरलङ्कारध्वनिसम्बन्धभेदोऽप्यलङ्कारध्वनेः वस्तुध्वनिसम्बन्धात् न पृथग्भूतः इति पूर्वपूर्वस्योत्तरोत्तरसम्बन्धे एकैकभेदन्यूनता ज्ञेया। तस्यापि मिश्रणस्य त्रिरूपेण संकरेणैकरूपया संसृष्ट्या च पुनश्चतुर्धा योजने ५३०४भेदाः। प्रस्तुते श्लोके ग्रन्थकारेण सा संख्या व्यपदिष्टा।

**शुद्धाश्चन्द्रशरा मिश्रा ऋतुनेत्रानलेन्दवः।**

**संसृष्टिसङ्करायातास्त्वब्धिखाग्निशराभिधाः।।**

स्वावलोकनप्रश्नाः

१. लक्षणाभिधामूलत्वेन ध्वनेः कति भेदाः?

२. अविवक्षितवाच्यस्य चातुर्विध्यं कथयत।

३. अर्थशक्तिमूलस्य त्रैविध्यं कथम् ?

४. संलक्ष्यक्रमव्यङ्ग्यध्वनेः कति भेदाः।?

ध्वनिभेदाः

अविवक्षितवाच्यः

अर्थान्तरसङ्क्रमितः अत्यन्ततिरस्कृतः

वाक्यगतः पदगतः   वाक्यगतः पदगतः

विवक्षितान्यपरवाच्यः

संलक्ष्यक्रमव्यङ्ग्यः  असंलक्ष्यक्रमव्यङ्ग्यः

शब्दशक्तिमूलम् अर्थशक्तिमूलम् उभयशक्तिमूलम्

वस्तुध्वनिः  अलङ्कारध्वनिः

वाक्यगतः पदगतः वाक्यगतः पदगतः

स्वतः सम्भवी   कविप्रौढोक्तिसिद्धः   कविनिबद्धोक्तिसिद्धः

वस्तुध्वनिः अलङ्कारध्वनिः वस्तुध्वनिः अलङ्कारध्वनिः वस्तुध्वनिः अलङ्कारध्वनिः

व्यङ्ग्यः व्यञ्जकः   व्यङ्ग्यः व्यञ्जकः व्यङ्ग्यः व्यञ्जकः व्यङ्ग्यः व्यञ्चकः व्यङ्ग्यः व्यञ्जकः व्यङ्ग्यः व्यञ्जकः

प्रबन्धगतः पदगतः वाक्यगतः प्रबन्धगतः पदगतः वाक्यगतः प्रबन्धगतः पदगतः वाक्यगतः प्रबन्धगतः पदगतः वाक्यगतः प्रबन्धगतः पदगतः वाक्यगतः प्रबन्धगतः पदगतः वाक्यगतः प्रबन्धगतः पदगतः वाक्यगतः प्रबन्धगतः पदगतः वाक्यगतः प्रबन्धगतः पदगतः वाक्यगतः

प्रबन्धगतः पदगतः वाक्यगतः

सर्वेषां ध्वनिप्रकराणामुदाहरणानि विषयविस्तारभयात् नैव प्रदत्तानि। किन्तु कतिचन अत्र उदाह्रियन्ते।

**१. अर्थान्तरसङ्क्रमिताविवक्षितवाच्यध्वनिः** - लक्षणामूलं यद् गूढव्यङ्ग्यं तस्य प्राधान्ये यः ध्वनिः स अविवक्षितवाच्यध्वनिः। अविवक्षितम् इत्युक्ते अनुपयुक्तम् । वाच्यं नाम वाच्यार्थः। यत्र वाच्यार्थः अर्थान्तरे वाच्यलक्ष्यसाधारणेऽर्थे सङ्क्रमितं परिणमितं भवति तत्र अर्थान्तरसङ्क्रमिताविवक्षितवाच्यध्वनिरिति। वाच्यार्थस्य अनुपयुज्यमान्यत्वात् यद्रूपेण वाच्यं तद्रूपेण प्रकृतान्वयेऽनभिप्रेतत्वात् अर्थान्तरमिति।

**यथा - मूर्धानो यूयमस्माकाः किमित्यौन्नत्यमिच्छथ।**

**प्रतापरुद्रस्य प्रणताः प्रतिपार्थिवाः।।** इति

यूयम् आस्माकाः मूर्धानस्सन्ति। इतोऽपि किमित्यौन्नत्यमिच्छथ इति प्रणताः प्रतापरुद्रस्य

प्रतिपार्थिवाः (शत्रवः)।

अत्र अस्माकं पदम् अर्थान्तरसङ्क्रमितवाच्यमस्ति। आस्माकप्रकृत्या अस्मच्छब्देन अस्मदर्थं हित्वैव तावतानुपयोगाद् दैन्यविशिष्टोऽस्मदर्थः सामान्यविशेषभावसम्बन्धेन लक्ष्यते। अतः आस्माका इति सर्वदैन्यभूमयो वयम् ईदृशानामस्माकं सम्बन्धिनो यूयमित्यर्थान्तरसङ्क्रमिताविवक्षितवाच्यता।

**२. अत्यन्ततिरस्कृतवाच्यो ध्वनिः** - प्रकृतान्वयानुपयोगितया इतरार्थमात्रलक्षकं वाच्यम् । वाच्यार्थस्य अनुपपद्यमानतया अत्यन्ततिरस्कृतवाच्यध्वनिः। यथा -

**विशदिमविलिप्तवियतो धवलिमपरिपूरिताखिलाशान्ताः।**
**विहरन्ति यशःपूरा गौराः श्रीकाकतीन्द्रस्य।।**

अत्र विशदिमविलिप्तवियत इति अत्यन्ततिरस्कृतवाच्यत्वम्। श्रीकाकतीन्द्रस्य धवलयशः आकाशव्याप्तम् । तेन यशसा सर्वदिशः परिपूरिताः। किमपि एवं नावशिष्टं यत्र धवलयशसा नैव लिप्तम् । अनेनैव क्रमेण वाक्यगतत्वेनाप्युदाहार्यम् ।

**३. अर्थशक्तिमूला वस्तुना वस्तुध्वनिः -**

यथा - **अब्दानृतून् विना मासान् शुक्लपक्षान् विना तिथीन् ।**
**रात्री विनापि काङ्क्षति काकतीयरिपुस्त्रियः।।**

अत्र ऋतुप्रभृतीनां कामोद्दीपकत्वात् तदभावो रिपुस्त्रीभिः आकाङ्क्ष्यते इति प्रतीयते। तेन तासां प्रियवियोगरूपं वस्तु व्यज्यते। अनेन प्रतापरुद्रस्य सर्वे शत्रवः निहता इति वाच्यादतिशयः। यथा प्रियविरहमधुराः शत्रुस्त्रियः कतिपयवत्सरान् जीविताशया प्रथममृतूनाभावं वाञ्छन्ति। अनन्तरं तानपि गमयितुमशक्ताः कतिपयमासेषु प्राणान् धारयितुमुद्युक्ता ज्योत्स्नावतां पक्षाणां विनाशं वाञ्छन्ति। अनन्तरं मासानपि अपनेतुमपारयन्त्यः कतिपयतिथिषु जीविताशया रात्रीणाम्

असृष्टिमभिलषन्ति इति बहुवस्तु वस्तुना व्यज्यते।

**४. वस्तुनालङ्कारध्वनिः यथा -**

**दृष्ट्वा काकतिवीररुद्रनृपतेः कीर्तिं जगत्व्यापिनीं**
**वस्तुं वाञ्छति शम्भुरत्र शयितुं लक्ष्मीपतिः काङ्क्षति।**
**स्नातुं धावति दिव्यतापसगणः संवर्धयितुं वार्धय**
**श्लेष्टन्ते सविलासमभ्रमुरपि स्प्रष्टुं शनैरीहते।।**

अत्र हरस्य कैलासभ्रान्तिः हरेः क्षीरार्णवभ्रान्तिरिति भ्रान्तिमदलङ्कारो व्यज्यते। कीर्तौ शम्भुप्रभृतीनां निवासाकाङ्क्षादिलक्षणेन वस्तुना तेषां यथाक्रमं कैलासक्षीरोदमन्दाकिनीचन्द्राभ्रमातङ्गभ्रान्तिरूपो भ्रान्तिमदलङ्कारो व्यज्यते। अत्र व्यङ्ग्यस्य प्राधान्येन अलङ्कार्यत्वेपि ब्राह्मणश्रमणन्यायेन प्रत्यभिज्ञानबलात् अलङ्कारव्यपदेशो न विरुध्यते।

**५. अलङ्कारेण वस्तुध्वनिः यथा -**

**प्रतापरुद्रस्य रणे कृपाणः सद्यः समुद्यद्रुधिरारुणश्रीः।**
**आलम्बते रोषकषायितस्य कालीकटाक्षस्य विजृम्भितानि।।**

अत्र आलम्बते इति निदर्शनालङ्कारेण सकलरिपुक्षयः क्षणात् कृत इति वस्तु व्यञ्जते। कृपाणस्य चण्डिकाकटाक्षविजृम्भितालम्बनासम्भवा द्विजृम्भितानीव विजृम्भितानीति सादृश्याक्षेपात् असम्भववस्तुसम्बन्धरूपो निदर्शनालङ्कारः।

**६. अलङ्कारेणालङ्कारध्वनिः यथा -**

**काकतीयविभोः कीर्तिपुण्डरीके विजृम्भिते।**
**धत्ते मधुकरक्रीडां तमालश्यामलं नभः।।**

अत्र कीर्तिपुण्डरीको नभो भ्रमरक्रीडां धत्ते इति निदर्शनालङ्कारेण आश्रय आश्रयिणोः अनानुगुण्यरूपोऽधिकालङ्कारो व्यज्यते। आश्रयस्य कीर्तिपुण्डरीकस्य वैपुल्यं भ्रमरसादृश्यप्रतिपादनेनाल्पत्वं नभसः प्रतीयते। एषु स्वतः सिद्धार्थशक्तिमूलत्वम् ।

**७. कविप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः यथा -**

**श्रावं श्रावं खुरलीविहरत्कार्तिकेयेषु जात -**
**च्छिद्रच्छद्मश्रवणपदवीचारिणीं चारणौघैः।**
**शश्वद्गीतां भुवनमहितां काकतीन्द्रस्य कीर्तिं**
**क्रौञ्चक्ष्माभृद्भवति महतो विस्मयान्निश्चलाङ्गः।।**

अत्र प्रतापरुद्रस्य कीर्तिः स्थावराणामपि विस्मयकारिणीति वस्तु व्यज्यते।

**८. वस्तुनालङ्कारध्वनिः यथा -**

**वीररुद्रभटान् दृष्ट्वा जयलक्ष्मीवृतान् रणे।**
**कर्षन्त्यरिवधूकेशान् कानने कण्टकिद्रुमाः।।**

अत्र जयलक्ष्मीसमालिङ्गितान् दृष्ट्वा समदना इव कण्टकिद्रुमाः शत्रुवधूकेशान् कर्षन्तीव इत्युत्प्रेक्षा व्यञ्जते।

**स्वावलोकनप्रश्नाः**

१. लक्षणामूलगूढव्यङ्ग्ये कः ध्वनिः?

२. वाच्यार्थस्य तिरस्कारः कुत्र उपपद्यते?

**९. अलङ्कारेण वस्तुध्वनिः**

यथा - अपसरति सखीभिः समं लज्जा वध्वाः शिथिलमानायाः।

आत्मग्रहणभयेनेव सविधगते मनोहरे दयिते।।

अत्र '**आत्मग्रहणभयेनेव**' इत्यनेन उत्प्रेक्षया आलिङ्गनरूपं वस्तु अभिव्यञ्जते।

**१०. अलङ्कारेणालङ्कारध्वनिः**

यथा - **अभयं याचमानानां काकतीयेन्द्रविद्विषाम् ।**

**रक्षां नाङ्गीकरोतीव वनं शाखाप्रकम्पनैः।।**

अत्र नाङ्गीकरोतीव इत्युत्प्रेक्षया प्रतापरुद्रशत्रुभ्यो रक्षणं कर्तुं वनमपि बिभेतीव इत्युत्प्रेक्षा।

**११. कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः**

यथा - **यथा तथा वा भवत्वार्या नरनाथ कुरु रक्षणं शशिनः।**

**यत्तया कटाक्षोल्का आज्ञप्ता तं मषीकर्तुम् ।।**

अत्र विरहातुरा आर्या चन्द्रिकामसहमाना रोषोज्ज्वलितया कटाक्षोल्कया चन्द्रं मषीकरोति स रक्षणीय इत्यनेन वस्तुना इतःपरं सा जीवितं धारयितुमशक्ता अधुनैव त्वया समागन्तव्यमिति वस्तु अभिव्यञ्जते।

**१२. वस्तुनालङ्कारध्वनिः**

यथा - **कस्त्वं शुभ्राखिलाङ्गश्चरसि ननु यशो वीररुद्रस्य वर्ते**

**कोऽयं ते दिव्यदेहः स्फुरति परिसरे मत्सुहृत्तत्प्रतापः।**

**प्रच्छाद्यालं स्फुरद्भिः कुमुदसरसिजैः ख्यापितं वां स्वरूपं**

**सोमार्कौ स्वागतं वामवधिगिरिरहं कल्पितो निस्तमस्कः।।**

अत्र प्रतापरुद्रयशः प्रतापयोः सोमार्कसादृश्यप्रतीतेरुपमा व्यज्यते। अत्र प्रथमार्धे लोकालोकवीररुद्रयशसोः प्रश्नोत्तरवाक्यानि चत्वारि। द्वितीयार्धमेकं लोकालोकवाक्यम् । उभयोरेकजन्यत्वादिति भावः।

**१३. अलङ्कारेणालङ्कारध्वनिः**

**यथा - पश्यत हला वध्वास्तथारूढोऽपि निर्भरो मानः।**

**नृपतिसमागमसंभ्रमसंजातभय इवापसरति।।**

अत्रोत्प्रेक्षया प्रियप्रार्थनां विनैव मानिनीमनः प्रसन्नमिति विभावनालङ्कारः।

**१४. अलङ्कारेण वस्तुध्वनिः**

**यथा - अप्राप्य सेवावसरं नाथ कान्तावृतस्य ते।**

**त्वत्कीर्तिं सेवमानेव श्यामा सर्वाङ्गपाण्डुरा।।**

अत्र सेवमाना इव इत्युत्प्रेक्षया सर्वथा स्वीकार्यत्वादिरूपं वस्तु व्यज्यते। विरहपाण्डिम्नः कीर्तिसेवाहेतुकत्वम् उत्प्रेक्ष्यते।

एवं प्रबन्धादिगतत्वेन यथासम्भवमुदाहरणानि द्रष्टव्यानि विस्तारभयाद् इह नोक्तानि। अथ शब्दशक्तिमूलध्वनिः वस्त्वलङ्कारगतत्वेन द्विविधः। तथा चोक्तम् -

**अलङ्कारोऽथ वस्त्वेव शब्दाद्यत्रावभासते।**

**प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा।।**

**तत्रालङ्कारध्वनिः**

**यथा - एष सत्यं राजा श्यामा खलु त्वं समागमो द्वयोः।**

**किं पुनर्न प्रदोषकथा दृश्यते एतत्खल्वाश्चर्यम् ।।**

प्रकरणेनात्र कान्तानृपवाचकाभ्यां श्यामाराजशब्दाभ्यां निशाचन्द्रप्रतीतेः उपमा। श्यामाराजशब्दवाच्ययोः कान्तानृपयोः प्रकृतयोरप्रकृतनिशाचन्द्राभेदाध्यवसायेन प्राप्तस्य प्रदोषस्य कालविशेषलक्षणस्य प्रतिषेधेन विरोधः प्रतीयते। तद्द्योतकम् आश्चर्यपदम् । परिहारस्तु दोषनिषेधादिति विरोधाभासोऽलङ्कारः।

**वस्तुध्वनिः**

**यथा - कान्तारवाससन्तप्ताः संश्रृणध्वं हितादितः।**
**कुरुध्वमधुना राजपादसेवां नरेश्वराः।।**

राजपादसेवामित्यत्र शब्दशक्त्या प्रकृतस्य प्रतापरुद्रस्य प्रतीतिः प्रकरणाज्जायते। अनेन प्रतापरुद्रस्य सेवा कर्तव्या किमरण्यवासेन सन्तप्ता इति वस्तुध्वनिः। राजपदस्य महिम्ना प्रतापरुद्रसेवा कर्तव्या नैव दुःखमनुभवितव्यमिति प्रकरणानुसारं ज्ञायते।

**उभयशक्तिमूलध्वनिः**

**यथा - जिष्णुरेष भुजस्तम्भजृम्भमाणाद्भुतायुधः।**
**मुञ्चन्तु क्ष्माभृतो निजपक्षविजृम्भितम् ।।**

मुञ्चन्तु जिष्णुरेष इत्यत्र शब्दशक्तिमूलता। भुजस्तम्भजृम्भमाणात् अद्भुतायुधः इत्यत्रार्थशक्तिमूलता।

**असंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः। तथा चोक्तम् -**

**रसभावतदाभासभावशान्त्यादिरक्रमः।**
**भिन्नो रसाद्यलङ्कारादलङ्कार्यतया स्थितः।। इति।**

गुणीभूतव्यङ्ग्यम् अष्टविधं निरूप्यते। गुणीभूतव्यङ्ग्यं मध्यमं काव्यमष्टविधम् । तथा चोक्तं काव्यप्रकाशे -

**अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम् ।**

**सन्दिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ।।इति।**

कामिनीकुचकलशवद् गूढागूढस्यैव चमत्कारकारित्वाद् अगूढव्यङ्ग्यं मध्यमं काव्यम्।

**१. अगूढम्** यथा -

**औन्नत्यं यदि वर्ण्यते शिखरिणः क्रुध्यन्ति नीचैः कृता**

**गाम्भीर्यं यदि कीर्त्यते जलधयः क्षुभ्यन्ति गाधीकृताः।**

**तत्त्वां वर्णयितुं बिभेमि यदि वा जातोऽस्म्यगस्त्यः स्थित-**

**स्त्वत्पार्श्वे गुणरत्नरोहणगिरे श्रीवीररुद्रप्रभो।।**

अत्र यदि वा जातोऽस्म्यगस्त्यः स्थितः इत्यनेन जलनिधिपर्वतेभ्यो न बिभेमीति व्यङ्ग्यमत्रागूढम् ।

**२. अपरस्याङ्गम्** - अपरस्याङ्गं यत्र रसादे रसादिरङ्गं तदपि गुणीभूतव्यङ्ग्यमेव। अत्र प्रथमादिशब्देन भावादयो वाक्यार्थीभूतो वाच्यश्च गृह्यन्ते। द्वितीयादिशब्देन च भावादयोऽनुरणनं च गृह्यन्ते। तेन यत्र अङ्गिनः रसभावादेः वाच्यस्य वा रसभावादिरनुरणनं व्यङ्ग्यत्वेन निबध्यते तदपराङ्गमित्यर्थः। यथा -

**वीतव्रीडमपास्तमौनमुदयद्वैस्वर्यमाविर्भव-**

**त्स्वेदं निर्भरगात्रवेपथु मिलन्मूर्च्छं गलद्बाष्पकम् ।**

**सञ्जातप्रलयं च काकतिमहीनाथ स्मरोद्वेजिता**

**भूपाः शैलगुहासु यान्ति विजनं भीत्या समालिङ्गिताः।।**

प्रस्तुतविशेषणसाम्यात् अप्रस्तुतनायकधर्मप्रतीतेः समासोक्तिः। अत्र अन्यपोषकत्वेन अङ्गस्यापि श्रृङ्गारस्य वर्ण्यमानत्वेन अप्राधान्यात् तद्वशेन गुणीभूतव्यङ्ग्यमित्येव व्यपदेशः न पुनः अङ्गीभूतभयानकरसापेक्षया ध्वनिरिति।

**३. वाच्यसिद्ध्यव्यङ्ग्यम्** - वाच्यस्य सिद्धेरुत्पत्तेः अङ्गमिति व्युत्पत्त्यैव स्वतःसिद्धस्य वाच्यस्य उपोद्वलकात् अपराङ्गादस्य भेदो दर्शितः।

**यथा - करालः काकतीन्द्रस्य करवालनवाम्बुदः।**
**धारया शमयत्युग्रं प्रतापज्वलनं द्विषाम् ।।**

जलधारात्र व्यङ्ग्या। सा च करवालनवाम्बुद् इत्यस्य वाच्यभूतस्य रूपकस्य सिद्धिकृदिति गुणीभूतव्यङ्ग्यम् । यतो रूपकं स्वनिर्वाहाय प्रतीयमानजलधारामपेक्षते। अन्यथा करवाल एव नवाम्बुदः करवालो नवाम्बुद इवेति वा रूपकोपमितसमासयोः सन्देहः स्यात्। न चात्र प्रयुज्यमानस्य करालत्वस्योपमितसमासबाधकत्वम्। केवलं करवालविशेषणत्वाङ्गीकारेण समानधर्मत्वाभावात्। अतः सन्देहः मास्तु। साधकबाधकाभाव एव तस्य अलङ्कारत्वादिति।

**४. अस्फुटं यथा** -

**वीररुद्रकृपाणस्य महिमा कोऽप्यनङ्कुशः।**
**प्रसूते कीर्तिगङ्गां यः पीत्वा द्विषदसृङ्नदीम् ।।**

५. **सन्दिग्धप्राधान्यं यथा** -

**काकतिक्ष्मापतेर्दृष्टिरनुरागतरङ्गिता।**
**लग्ना कल्हारमालेव वध्वास्तुङ्गे कुचद्वये।।**

अत्रालिङ्गनेच्छया वाक्यविश्रान्तिः अथवा स्तनमण्डलालोक एवेति सन्देहः।

**६. तुल्यप्राधान्यं यथा -**

**नृपा प्रतापरुद्रस्य निषेवध्वं पदाम्बुजे।**
**अन्यथास्य मनस्तादृक्प्रसादं कलुषायते।।**

प्रतापरुद्रस्य पादसेवा यदि त्यज्यते तदानीं नगरेषु वासो दुर्लभ इति व्यङ्ग्यार्थस्य वाच्यस्य च समं प्राधान्यमत्र।

**७. असुन्दरं यथा -**

**एकशिलामहिलानां श्रुत्वा नरेन्द्रदर्शनामोदम् ।**
**गुरुजननियन्त्रिताया वध्वाः श्यामलं वदनम् ।।**

अत्र गुरुजनपराधीना काचित् एकशिलामहिलानां नरेन्द्रदर्शनसन्तोषं श्रुत्वा मलिनमुखा अभूदिति। नरेन्द्रदर्शननिमित्तं हर्षमुत्पश्यन्त्या वध्वा मुखं श्यामलमिति वाच्यस्यैव चारुत्वम् । गक्रुरुजननियन्त्रिताहं नरेन्द्रं द्रष्टुं न गतवती अस्मि इति व्यङ्ग्यार्थस्याचारुत्वम् ।

**८. काक्वाक्षिप्तम्** - काकुर्नाम शब्दधर्मः। तत्प्रयोगे सर्वत्र शब्दस्पृष्टत्वेन व्यङ्ग्यस्य गुणीभाव एव। यत्र काक्वार्थान्तरमाक्षिप्यते तदपि गुणीभूतव्यङ्ग्यमेव। यथा -

**प्रियसखि कथयाधिका क्षोणी लक्ष्मीः सरस्वती मत्तः।**
**यां बहु मन्यते सोऽयं नरनाथो गुणविशेषज्ञः।।**

क्षोणी मदधिकेति अत्र काकुकल्पनया अधिका न भवतीति वस्तु व्यज्यते। केवलं वाच्यसामर्थ्यलभ्यत्वेन व्यङ्ग्यत्वम् ।

चित्रकाव्यं तु शब्दार्थालङ्कारचित्रतया बहुविधम् । तस्य विवरणं अलङ्कारप्रकरणे भविष्यतीति ग्रन्थकारस्य सूचना।

स्वावलोकनप्रश्नाः

१. शब्दशक्तिमूलध्वनिः कथं द्विविधः?

२. गुणीभूतव्यङ्ग्यं कतिविधम् ?

३. काकुः इत्यस्य कोऽर्थः?

४. वाच्यव्यङ्ग्यार्थस्य समं प्राधान्यं कुत्र भवति ?

## २.३. महाकाव्योपकाव्यादिप्रबन्धनिरूपणम्

काव्यसामग्रीं विवेच्य महाकाव्यादयः प्रबन्धाः कथं भवन्तीति ग्रन्थकारेण निरूप्यते। महाकाव्यं कदा सम्भवति ? तत्र किं किम् अपेक्ष्यते ? अस्मिन् विषये साम्प्रतमुच्यते। प्रस्तुतकारिकासु महाकाव्यलक्षणमाह -

**नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनम् ।**
**उद्यानसलिलक्रीडामधुपानरतोत्सवाः।।**

**विप्रलम्भो विवाहश्च कुमारोदयवर्णनम् ।**
**मन्त्रद्यूतप्रयाणाजिनायकाभ्युदया अपि।।**

**एतानि यत्र वर्ण्यन्ते तन्महाकाव्यमुच्यते।**
**एषामष्टादशानां यैः कैश्चिदूनमपीष्यते।।**

अर्थात् महाकाव्ये नगर- समुद्र - पर्वत - ऋतु - चन्द्रसूर्योदयवर्णनमावश्यकम् । उद्यान - जलक्रीडा - मधुपान - रतोत्सव - विप्रलम्भ - विवाह - कुमारजन्मादिनिरूपणं तत्र निर्दिश्यते।

तथैव मन्त्र - द्यूत - विजययात्रा - युद्ध - नायकाभ्युदयविषया अपि तत्र प्रतिपादनीयाः। प्रस्तुतवर्णनं यत्रोपलभ्यते तन्महाकाव्यमुच्यते। एषामष्टादशानां वर्णनं प्रायशः भवेत् । तेषु कतिपयान् वर्जयितुमपि शक्यते।

तत्काव्यं त्रिविधम् । गद्यमयं पद्यमयमुभयमयं चेति। अपादः पदसङ्घातो गद्यं, पद्यं चतुष्पदम्। पादविरहितः पदसङ्घातः यत्र तद् गद्यकाव्यम् । यथा कादम्बर्यादि। चतुष्पदं पद्यम्। पद्यकाव्यं रघुवंशादि। असर्गबन्धमपि यदुपकाव्यमुदीर्यते। अर्थात् सर्गविरहिता रचना यत्र तदुपकाव्यम् इति। सूर्यशतकादि असर्गबन्धम् । गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते। यथा दमयन्तीपरिणयचम्पूकाव्यम् । वक्त्रं चापरवक्त्रं च सोच्छ्वासत्वं च भेदकम् । वर्ण्यते यत्र काव्यज्ञैरसावाख्यायिका मता। यत्र वक्त्रापरवक्त्रनामानौ वृत्तविशेषौ वर्ण्येते सोच्छ्वासपरिच्छिन्ना आख्यायिका। यथा हर्षचरितादि। आख्यायिका नाम कश्चित् गद्यविशेषः।

**इदमवधेयम् -**

| | | विशेषः | उदाहरणम् |
|---|---|---|---|
| | गद्यम् | अपादः पदसङ्घातः | कादम्बरी, दशकुमारचरितम् |
| काव्यम् | पद्यम् | चतुष्पदम् | रघुवंशम् , शिशुपालवधम् |
| | चम्पूः (उभयम्) | गद्यपद्यमयम् | नलचम्पूः, भागवद्चम्पूः |

स्वावलोकनप्रश्नाः

१. महाकाव्यलक्षणे कति वर्ण्यविषयाः व्यपदिष्टाः ?

२. पद्यकाव्यस्य उदाहरणं लिखत ?

३. उपकाव्यस्य वैशिष्ट्यं किम् ?

४. भवता किं महाकाव्यं पठितम् ?

५. गद्यकाव्यस्य किं प्रसिद्धमुदाहरणम्?

## २.४. क्षुद्रप्रबन्धनिरूपणम्

क्षुद्रप्रबन्धस्य लक्षणं ग्रन्थकारः एवं विवृणोति -

**‘ येन केनापि तालेन गद्यपद्यसमन्वितम् ’**।

यत्र इतिवृत्तं येन केनापि तालेन गद्यपद्यान्वितं वर्तते। तत्र क्षुद्रप्रबन्ध इति। तस्य

केचन प्रकारा अत्र प्रदर्श्यन्ते।

**१. उदाहरणम् - जयत्युपक्रमं मालिन्यादिप्रासविचित्रितम् ।**

**तदुदाहरणं नाम विभक्त्यष्टकसंयुतम् ।।**

यत्रादौ जयत्युपक्रमं मालिन्यादिवृत्तेन रम्यं पद्यं निबध्यते, अनन्तरं 'अपि च' इत्युपक्रमाणि अष्टवाक्यानि सप्रासानि सतालानि प्रतिविभक्ति निबध्यन्ते, ततःविभक्त्याभासाः वर्तन्ते तत् उदाहरणमिति।

**२. चक्रवालम् - सम्बोधनविभक्त्या यत् प्रचुरं पद्यपूर्वकम् ।**

**विमुक्तपुनराकृष्टशब्दं स्याच्चक्रवालकम् ।।**

यस्मिन् काव्ये सम्बोधनविभक्तिः, प्रचुरं पद्यं तथैव विमुक्तः सन् पुनराकृष्टः शब्दः भवति तत् चक्रवालकम् ।

**३. भोगावली - आद्यन्तपद्यसंयुक्ता संस्कृतप्राकृतात्मिका।**

**अष्टाभिर्वा चतुर्भिर्वा वाक्यैः स्कन्धसमन्विता।।**

अर्थात् यत्र आद्यन्तपद्यं संस्कृतेन तथा च मध्यपद्यानि प्राकृतभाषया भवन्ति। अपि च चतुर्भिः वा अष्टभिः वाक्यैः सर्गः इव परिच्छेदः वर्तते। न तावदेव -

**प्रतिस्कन्धं भिन्नवाक्यरीतिर्देवनृपोचिता।**

**सर्वतो देवशब्दादिरेषा भोगावली मता।।**

प्रतिस्कन्धं देवनृपोचिता भिन्नवाक्यरीतिः विद्यते। तथैव सर्वत्र भवति देवः शब्दस्य उपन्यासः सः प्रबन्धः भोगावली इत्यभिधीयते।

**४. विरुदावली - वर्ण्यमानाङ्कविरुदवर्णनप्रचुरोज्ज्वला।**

**वाक्याडम्बरसंयुक्ता सा मता विरुदावली।।**

यः वर्ण्यमानाङ्कः विरुदप्रचुरवर्णनेन उज्ज्वलः वाक्याडम्बरसंयुक्तश्च सः विरुदावली इति प्रसिद्धः।

**५. तारावली** - ताराणां सङ्ख्यया पद्यैर्युक्ता तारावली मता।

ताराणां सङ्ख्याभि इव सप्तविंशतिपद्यैः युक्ता रचना 'तारावली' इति।

एवं कविप्रौढोक्तिसिद्धाः क्षुद्राः प्रबन्धाः यथासम्भवमूह्याः। अथैतेषाम् उदाहरणानि विस्तरभयादिह नोक्तानि। इत्थं क्षुद्रप्रबन्धानां परिचयमात्रं निरूपणमत्र उपपद्यते।

**स्वावलोकनप्रश्नाः**

१. अत्र क्षुद्रप्रबन्धस्य कति प्रकाराः समुल्लिखिताः?

२. तारावली इत्यत्र कति पद्यानि मन्यन्ते?

३. सर्वत्र देवः इति शब्दस्य उपन्यासः कस्मिन् क्षुद्रप्रबन्धे भवति?

अत्र निरूपिताः क्षुद्रप्रबन्धभेदाः सङ्क्षेपेण अधः प्रदर्शिताः।

| | |
|---|---|
| | उदाहरणम् |
| | चक्रवालकम् |
| **क्षुद्रप्रबन्धभेदाः** | भोगावली |
| | विरुदावली |
| | तारावली |

## २.४. उपसंहारः

अस्मिन् द्वितीये खण्डे प्रतापरुद्रीयम् इत्यस्मिन् ग्रन्थे समासादिताः अंशाः विशदीकृतास्सन्ति। तत्र ह्यादौ काव्यस्वरूपं विलिख्य काव्यलक्षणम् अभिहितम् । ततः काव्यसम्पदः एकैकांशः सविस्तरं प्रबोधितः। शब्दवृत्तिविवेचनं, कैशिक्यादिवृत्तिवर्णनं रीतिपरिचयादि विषयाः अत्र परिशीलिताः। प्रोक्ताश्च ध्वनिविशेषाः सङ्क्षेपेण विस्तारभयात् । महाकाव्यलक्षणं क्षुद्रप्रबन्धस्वरूपञ्च विवेचितमत्र।

प्रतापरुद्रीयम् - द्वितीयखण्डः

**दीर्घप्रश्नाः**

१. प्रतापरुद्रीयदिशा काव्यस्वरूपं प्रतिपाद्य काव्यसम्पदः सङ्क्षेपेण परिचाययत।

२. शब्दवत्तीः विवेचयत।

३. लक्षणावृत्तिं सप्रकारं निरूपयत।

४. व्यञ्जनाप्रकारान् व्याख्यात।

५. कैशिक्यादीनां स्वरूपं प्रतिपादयत।

६. काव्यरीतिवर्णनं कुरुत।

७. काव्यभेदान् दर्शयत।

८. गुणीभूतव्यङ्ग्यप्रकारान् विचारयत।

९. प्रतापरुद्रग्रन्थमधिकृत्य क्षुद्रप्रबन्धभेदान् लिखत।

१०. ‘काव्यं त्रिविधम्’ इति स्पष्टयत।

११. टिप्पणीः लिखत।

१. अभिधा २. वैदर्भी ३. भारती ४. पाकः ५. सारोपालक्षणा ६. अविवक्षितवाच्यध्वनिः

७. ध्वनिकाव्यम्

# दोषप्रकरणम्- तृतीयखण्डः

**संरचना**

३.० प्रस्तावना।
३.१ लक्षिताधिगमविशेषाः।
३.२ दोषस्वरूपम्।
 ३.२.१ पददोषाः।
 ३.२.२ वाक्यदोषाः।
 ३.२.३ अर्थदोषाः।
३.३ उपसंहारः
३.४ प्रश्नाः

## ३.० प्रस्तावना

अथ काव्यस्वरूपनिरूपणानन्तरं काव्यसौन्दर्ये विघ्नोत्पादकानि कारणानि ज्ञापयितुं प्रयतते ग्रन्थकारः। काव्ये रसविघ्नोत्पादकाः 'काव्यदोषाः' इति प्रकीर्तिताः। अलङ्कारग्रन्थेषु काव्यदोषविवरणं बहुत्र उपलभ्यते। परं सम्प्रति 'प्रतापरुद्रीयम्' इत्यस्मिन् ग्रन्थे श्रीविद्यानाथेन विवेचिताः काव्यदोषाः अस्माभिः अवलोक्यन्ते।

## ३.१ लक्षिताधिगमविशेषाः

- छात्रः दोषसामान्यलक्षणमवगच्छति।
- काव्यदोषस्वरूपमत्र ज्ञातुं प्रभवति।
- दोषप्रकारान् अवगम्य स्वयं दोषविभाजनं निर्दिशति।
- काव्यदोषान् प्रतिपादयितुं शक्नोति।
- काव्यान्तर्गतदोषदर्शने नैपुण्यमाप्नोति।

## ३.२ दोषस्वरूपम्

काव्यगुणानां सम्यग्विवेकाय दोषनिरूपणम् अत्यावश्यकम्। ऋते दोषनिरूपणात् काव्यहानेः हेतुज्ञानं नैव सम्भवति। **'दूषयत्यसौ इति दोषः'** एवं दोषपदस्य व्युत्पत्तिः। यः काव्यं दूषयतीति सः काव्यदोषः। तात्पर्यं काव्यार्थदूषकः काव्यरसदूषको वा काव्यदोषः। तस्मादेव 'मुख्यार्थहतिदौषो' इति मम्मटाचार्यः दोषलक्षणं प्रत्यपादयत्। वामनाचार्यस्तु 'गुणविपर्ययात्मानो दोषाः' इति दोषस्य सामान्यलक्षणं कथयति। परं ग्रन्थकारोऽयं श्रीविद्यानाथः दोषसामान्यलक्षणम् एवं विवृणोति - **'दोषः काव्यापकर्षस्य हेतुः शब्दार्थगोचरः'**। इति।

काव्यापकर्षः नाम काव्यहतिः काव्यहानिर्वा। अस्य काव्यापकर्षस्य यः हेतुः सः दोष इति। अयं काव्यदोषः शब्दार्थगोचरः भवति। कथमिति चिन्तिते सति शब्दार्थमयत्वं काव्यमिति ख्यातिः। तस्मात् शब्दार्थमयत्वात् काव्यस्य तदपकर्षहेतूनामपि दोषाणां शब्दगतत्वेनार्थगतत्वेन च द्वैविध्यम्। शब्दगतानामपि पदवाक्यगतत्वेन च द्वैविध्यम्। एवं दोषप्रकाराः अधोनिर्दिश्यन्ते।

**काव्यदोषाः**

शब्ददोषाः          अर्थदोषाः

पददोषाः          वाक्यदोषाः

अधुना काव्यदोषप्रकाराः एकैकशः बोधनाय स्वीक्रियते।

**स्वावलोकनप्रश्नाः**

(१) श्रीविद्यानाथप्रणीतं दोषसामान्यलक्षणं लिखत।

(२) काव्यदोषः कुत्र दुग्गोचरः भवति?

(३) दोषप्रकाशन् कथयत।

### ३.२.१. पददोषाः

शब्दगतदोषयोः एकतरः पददोष इति। ग्रन्थकारेण सप्तदशपददोषाः व्यपदिष्टाः।

**पददोषाः**

(१) अप्रयुक्तः
(२) अपुष्टार्थः
(३) असमर्थः
(४) निरर्थकः
(५) नेयार्थः
(६) च्युतसंस्कारः
(७) सान्दिग्धः
(८) अप्रयोजकः
(९) क्लिष्टः
(१०) गूढार्थकः
(११) ग्राम्यः
(१२) अन्यार्थः
(१३) अप्रतीतिकः
(१४) अविमृष्टविधेयांशः
(१५) विरुद्धमतिकृतः
(१६) अश्लीलः
(१७) परुषः

इमे दोषाः प्रस्तुतकारिकासु उल्लेखिताः। कारिकायां निर्दिष्टं 'दुष्टपदं' दोषार्थप्रतिपादकम्।

अप्रयुक्तमपुष्टार्थमसमर्थं निरर्थकम्।
नेयार्थं च्युतसंस्कारं संदिग्धं चाप्रयोजकम्।।

क्लिष्टं गूढार्थकं ग्राम्यमन्यार्थं चाप्रतीतिकम्।
अविमृष्टविधेयांशं विरुद्धमतिकृत् तथा।।

अश्लीलं परुषं दुष्टं पदं सप्तदशाङ्कितम्।

एषां स्वरूपं सम्प्रति निरूप्यते।

**(१) अप्रयुक्तपददोषः**

**लक्षणम्** - 'आम्नातमपि कविभिर्नादृतं त्वप्रयुक्तम्।।'

आम्नातमिति कोशव्याकरणादिसिद्धं परं कविसम्प्रदायनिषिद्धं पदं काव्ये प्रयुज्यते चेत् अप्रयुक्तपददोषः। उदाहरणार्थम् -

विमुखा दैवताः सर्वे ते नो दुश्च्यवनादयः।
अण्यगृहमेधिन्यो यैर्वयं हन्त कल्पिताः।।

अत्र दैवतदुश्च्यवनशब्दयोः यथाक्रमं लिङ्गानुशासनशब्दानुशासनाम्नातयोरपि कवीनामनादरात् दुष्टत्वम्। दैवता इति पुल्लिङ्गप्रयोगः न क्वापि दृश्यते। तथा च दुश्च्यवन इति चेन्द्रपरत्वेन पदं कविभिर्न प्रयुक्तम् तस्मात् अप्रयुक्तपददोषः।

**(२) अपुष्टार्थपददोषः**

**लक्षणम्** - प्रकृतानुपयुक्तार्थमपुष्टार्थं तदुच्यते।

प्रस्तुतपदार्थं द्योतयितुमनुपयुक्तः शब्दः अपुष्टार्थदोष इत्युच्यते।

**(३) असमर्थपददोषः**

**लक्षणम् -** योगमात्रं प्रसिद्धं यदसमर्थं तदुच्यते।

प्रकृति-प्रत्यययोगेन शास्त्रमात्रप्रसिद्धार्थः वाचकशक्तिविरहितार्थः च शब्दः यत्र प्रयुज्यते तत्र असमर्थपददोषः। यथा हि -

विहाय वसुधामेनां चतुरम्बुधरावृताम्।
क्व नु गन्तव्यमस्माकमरण्येऽप्यसुखा स्थितिः।।

अत्राम्बुधरशब्दस्य समुद्रार्थे शास्त्रप्रसिद्धिरेव न तु वाचकशक्तिः। यत्किञ्चित्सहकारं विना अनुशिष्टार्थबोधकत्वम् असमर्थत्वमिति।

**(४) निरर्थकपददोषः**

**लक्षणम्** - पादपूरणमात्रं यत्तत्निरर्थकमुच्यते।

पादपूरणमात्रप्रयोजनं नाम वृत्तन्यूनतापरिहारमात्रप्रयोजनं यस्य पदस्य विद्यते तत्र निरर्थकपददोषः। उदाहरणं अधोनिर्दिष्टमस्ति।

### (५) नेयार्थपददोषः

**लक्षणम्** - स्वसङ्केतप्रसिद्धार्थं नेयार्थं परिकीर्त्यते।

स्वसङ्केतमात्राधीनार्थं पदं प्रयुज्यते चेत् नेयार्थपददोषः। विवक्षया पदार्थयोजना नेयार्थपददोषं निर्माति। यथा हि -

विहाय च गृहांस्तान् वै व्यत्यस्तनववृत्तयः।
कदा भविष्यते वासः कटकेषु महीभृताम्।।

अत्र हि 'वै' शब्दस्य पादपूरणप्रयोजनकत्वेन निरर्थकपददोषः। तथैव व्यत्यस्तनवेत्यत्र वर्णव्यत्यासेन वनप्रतीतिः स्वसङ्केतमात्रायत्तेति नेयार्थपददोषोऽपि विद्यते।

### (६) च्युतसंस्कारपददोषः

लक्षणम् - शब्दशास्त्रविरुद्धं यच्च्युत्संस्कारमुच्यते।

स्पष्टमेव यत् व्याकरणशास्त्रविरुद्धपदयोजना यत्र, तत्र च्युतसंस्कारपददोषः इति। पूर्वोक्ते उदाहरणे 'भविष्यते' इति भवतेरात्मनेपदित्वं शब्दशास्त्रविरुद्धमिति च्युतसंस्कारपददोषः।

### (७) सन्दिग्धपददोषः

लक्षणम् - सन्दिग्धं तन्मतं यत्स्यात् सन्दिग्धार्थप्रतीतिकृत्।

सन्देहार्थप्रतीतिद्योतकं पदं यत्र प्रयुक्तं तत्र सन्दिग्धपददोषः। सन्देहजन्यपदं सन्दिग्धपददोषाय कारणम्। पूर्वोक्तोदाहरणे 'महीभृतां कटकेषु वास, इत्यनेन राज्ञां नगरेषु वास उत पर्वतानां नितम्बेष्विति सन्देहात् सन्दिग्धपददोषः वर्तते।

स्वावलोकनप्रश्नाः

(१) अप्रयुक्तपददोषस्य लक्षणं लिखत।

(२) निरर्थक-नेयार्थ-च्युतसंस्कार-सन्दिग्धश्चेति पददोषाः कस्मिन् उदाहरणे सम्भूय दृश्यन्ते?

## (८) अप्रयोजकपददोषः

लक्षणम् - तदप्रयोजकं यत् स्यादविशेषविधायकम्।।

विशेषार्थं न बोधयति तत्पदं अप्रयोजकपददोषयुक्तम्। उदाहरणम् अधो निर्दिश्यते।

## (९) क्लिष्टपददोषः

लक्षणम् - क्लिष्टं तदर्थावगतिर्दूरदूरा यतो भवेत्।

अर्थात् यस्य पदस्य अर्थप्रतिपत्तिः कठिना तत्पदं क्लिष्टपदम्। अर्थावगमने क्लेषजन्यं पदं क्लिष्टपददोषं प्रदर्शयति।

हन्त वर्तामहे वज्रघट्टनात् प्राक् चलात्मसु।
नभस्वदशनारातिध्वजाग्रजविरोधिषु।।

अत्र नभस्वदशनाः नाम सर्पाः। तेषामरातिर्गरुडः। अयं गरुडः एव ध्वजो यस्येति विष्णुस्तस्याग्रज इन्द्रः। इन्द्रस्य विरोधिषु नाम पर्वतेष्वित्यर्थप्रतीतिः क्लेशेन सम्भवति तस्मात् क्लिष्टपददोषोऽत्र। पर्वतेषु वर्तनं दुःखावहमिति प्रकृतेः वज्रघट्टनात् प्राक् चलात्मस्विति पर्वता विशेषणस्य अनुपयुक्तत्वाद् अप्रयोजकपददोषोऽपि।

## (१०) गूढार्थपददोषः

लक्षणम् - प्रयुक्तमप्रसिद्धार्थे गूढार्थं परिकीर्त्यते।

अप्रसिद्धार्थबोधकपदं गूढार्थपदम्। यत्र हि गूढार्थपदं प्रयुक्तं तत्र गूढार्थपददोषः। उदाहरणं अधोनिर्दिष्टं वर्तते।

## (११) ग्राम्यपददोषः

लक्षणम् - पामरव्यवहारैकप्रसिद्धं ग्राम्यमुच्यते।

ग्रामे भवो ग्राम्यः। पामरव्यवहारे एव प्रयुक्तं पदं ग्राम्यम्। ग्राम्यपदस्य प्रयोगः ग्राम्यपददोषं निर्दिशति। उदाहरणं अधोनिर्दिष्टं भवति।

## (१२) अन्यार्थदोषः

लक्षणम् - यद्रूढिप्रच्युतं नाम तदन्यार्थमुदाहृतम्।

रूढिः इत्युक्ते प्रसिद्धिः। यत्पदं रूढेः प्रच्युतं तदन्यार्थवाचकम्। तात्पर्यं रूढिद्वारा प्राप्तं

प्रसिद्धार्थं विहाय अन्यार्थवाचकपदं प्रयुक्तं चेत अन्यार्थदोषः। यथा हि -

शोणिनाब्जदृशः कामं श्यामगल्लकटिस्थलाः।
विदग्धहृदयाः शोकवह्निना राजकन्यकाः।।

अत्र हि शोणितशब्दस्य रुधिरे प्रसिद्धस्य पाटलवर्णपरत्वेन प्रयोगात् गूढार्थपददोषः। गल्लकटिशब्दौ कपोलजघनपरत्वेन ग्राम्यप्रयुक्तौ अतः ग्राम्यपददोषः। तथा च विदग्धहृदया इति विशेषणं दग्धहृदयस्य अवाचकत्वात् अन्यार्थपददोषः अत्र।

### (१३) अप्रतीतिकपददोषः

लक्षणम् - शास्त्रमात्रप्रसिद्धं यदप्रतीतिकमुच्यते।

केवलं शास्त्रे प्रसिद्धं यत्पदं तदप्रतीतिकपददोषविधायकम्।

उदाहरणार्थम् - मनूपदेशाः क्व गताः कुलाचार्यैरुदीरिताः।

अत्र मनुशब्दो मन्त्रपरत्वेन मन्त्रशास्त्रमात्रप्रसिद्ध इत्यप्रतीतिकम्।

### (१४) अविमृष्टविधेयांशपददोषः

लक्षणम् - अविमृष्टाविधेयांशं गुणीभूतविधेयकम्।

प्राधान्येन अनिर्दिष्टो नाम अनुक्तो विधेयांशो यत्र तदविमृष्टविधेयांशम्। अतः गुणीभूतविधेयकमिति आह। उदाहरणार्थम् -

व्यर्थाष्टार्धार्धबाहूनाममीषामीदृशां दशाम्।
कथं सहामहे धिग्धिक् कठिनं हन्त जीवितम्।।

अत्र हि बाहुद्वयस्य वैयर्थ्ये विधेये तस्योपसर्जनत्वं प्रतीयते। दुर्दशाप्रस्तावे बाहूद्देशेन विधेयस्य वैयर्थ्यस्य अन्यपदार्थप्रधानबहुव्रीहिवर्तिपदार्थत्वेन गुणीभावात् अविमृष्टविधेयांशाख्यो दोषः।

### (१५) विरुद्धमतिकृत्दोषः

लक्षणम् - विपरीतार्थधीर्यस्माद्विरुद्धमतिकृन्मतम्।

यस्मात् पदात् विपरीतार्थधीः भवति तत्पदं विरुद्धमतिकृत्। यथा हि -

अम्बिकारमणस्याङ्घ्रिसेवा व्यर्था कथं भवेत्।
राज्ञामकार्यमित्राणां विनाशं समुपेयुषाम्।।

श्लोकेऽस्मिन् अम्बिकारमणशब्दात् मातृसम्भोगकारिणः प्रतीतिः। अकार्यमित्रशब्दात्

अकार्येषु मित्राणीति प्रतीतिः। वियोगदुःखपरतया प्रयुक्ताद्विनाशशब्दात् नाशप्रतीतिरिति विरुद्धमतिकृत्दोषः।

### (१६) अश्लीलपददोषः

लक्षणम् - अश्लीलं यदमाङ्गल्यजुगुप्साव्रीडधीकरम्।

अमङ्गलव्रीडजुगुप्साप्रतीतिकरं त्रिविधमश्लीलम्। एतेषां पदानां प्रयोगः अश्लीलपददोषं निर्दिशति। अश्लीलम् इत्युक्ते अशोभनम्। व्रीडा नाम लज्जा। उदाहरणार्थम् -

अभिप्रेतपदावासः कदा नः सम्भविष्यति।
नीचं साधनमेतेषां परोत्सर्गैकजीविनाम्।।

अत्राभिप्रेतपदावासशब्दात् प्रेतलोकपदावासप्रतीतेः अमङ्गलत्वम्। नीचं साधनमित्यनेन तुच्छमेहनप्रतीतेः व्रीडाकरत्वम्। परोत्सर्गैक जीविनामित्यत्र उत्सर्गशब्दात् अधोवायुप्रतीतेः जुगुप्साकरत्वम्।

### (१७) परुषपददोषः

लक्षणम् - परुषं नाम तद्यत् स्याद्विहितं परुषाक्षरैः।

परुषवर्णैः नाम श्रोतुः विरक्तिम् आपादयतीति दुष्टवर्णैः परुषपददोषः सम्भवति। करुणरसाननुगुणत्वेन श्रुतिकटुभिर्वर्णैः सरेफद्वितीयसंयोगादिभिरारब्धमित्यर्थः। उदाहरणार्थम् कुतः कान्तारवृत्तीनां कार्तार्थ्यार्थित्वमस्ति नः। अत्र कार्तार्थ्यार्थित्वमिति परुषवर्णारब्धत्वम्। कार्तार्थ्यार्थित्वं नाम धन्यताभिलाषित्वम्। ग्रन्थकारेण इत्यं पददोषाः विवेचिताः।

**स्वावलोकनप्रश्नाः**

(१) क्लिष्टपददोषः कुत्र उद्भवति?

(२) 'शोणिताब्जदृशः . . . 'इत्यस्मिन् श्लोके कति दोषाः अन्तर्भूताः के च ते?

(३) विरुद्धमतिकृत्दोषस्य लक्षणं लिखत।

(४) अश्लीलं कतिविधम्?

(५) परुषपददोषः कदा सम्भवति?

### ३.२.२ वाक्यदोषाः

शब्दगतदोषयोः अन्यतरः वाक्यदोष इति। ग्रन्थकारेण चतुर्विंशतिः वाक्यदोषाः प्रतिपादिताः। तेषां निर्देशः अधो क्रियते।

| | | | |
|---|---|---|---|
| (१) शब्दहीनः | (२) क्रमभ्रष्टः | (३) विसन्धिः | (४) पुनरुक्तिः |
| (५) व्याकीर्णः | (६) वाक्यसङ्कीर्णः | (७) अपूर्णः | (८) वाक्यगर्भितः |
| (९) भिन्नलिङ्गः | (१०) भिन्नवचनदोषः | (११) न्यूनोपमः | (१२) अधिकोपमः |
| (१३) भग्नच्छन्दः | (१४) यतिभ्रष्टः | (१५) अशरीरदोषः | (१६) अरीतिकः |
| (१७) विसर्गलुप्तः | (१८) अस्थानसमासः | (१९) वाच्यवर्जितः | (२०) पतत्प्रकर्षः |
| (२१) अधिकपदम् | (२२) प्रक्रमभङ्गवत् | (२३) समाप्तपुनरात्तः | (२४) सम्बन्धवर्जितः। |

एवं वाक्यसमाश्रिताः चतुर्विंशतिः वाक्यदोषाः प्रोक्ताः। तेषाम् एकैकशः स्वरूपमुदाहरणञ्च सम्प्रति प्रस्तूयते।

## (१) शब्दहीनवाक्यदोषः

**लक्षणम्** - 'शब्दशास्त्रहतं वाक्यं शब्दहीनं प्रकीर्त्यते।'

शब्दशास्त्रनियमविरुद्धं वाक्यं शब्दहीनवाक्यदोषयुक्तम् भवति। उदाहरणार्थम् -

न संशृणुमहे हन्त हितमाप्तैर्निमन्त्रितम्।
येन काकतिभूभर्तुः सेवां हित्वा हता वयम्।।

अत्र 'हितं न संशृणुमहे' इति पदद्वयप्रयोगे दोषाविष्काराद्वाक्यमेव दुष्टमिति न पददोषशङ्का स्वीकार्या। सम्पूर्वस्य शृणोतेरात्मनेपदित्वे कर्मणोऽनुपादाननियमात्।

## (२) क्रमभ्रष्टवाक्यदोषः

**लक्षणम्** - 'क्रमभ्रष्टं भवेदार्थः शाब्दो वा यत्र न क्रमः।'

यस्मिन् वाक्ये अर्थक्रमः वा शब्दक्रमः वेति न भवतः तत्र क्रमभ्रष्ट दोषः।

उदाहरणार्थम् - प्रभवे काकतीन्द्राय तुरगान् करिणोऽथवा।
उपायनमकुर्वाणा वयं दैवेन वञ्चिताः।।

अत्र हि करिणो यद्वा तुरगानिति वक्तव्ये व्युत्क्रमेणोक्तम्, तुरगापेक्षया करिणाम् उत्कृष्टत्वात्। अथवा करिण इत्यर्थक्रमभङ्गः।

का नाम गणनास्मासु काकतीयस्य भूपतेः।
यशः प्रतापयोर्मग्नो सूर्याचन्द्रमसावपि।।

अत्र यशःप्रतापयोः चन्द्रसूर्यौ मग्नाविति शब्दक्रमे उचिते। किन्तु तथा नोक्तम्। यशःप्रतापयोः सूर्याचन्द्रमसौ मग्नविति समुदायद्वयान्वये यथायोग्यम् अर्थान्वये नार्थक्रमविरोधः। अपि तु शब्दप्रयोगः एव क्रमभङ्गः। अतः शब्दक्रमभङ्गदोषः।

## (३) विसन्धिवाक्यदोषः

लक्षणम् - विसंहितो विरूपो वा यस्य सन्धिर्विसन्धिः तत्। विगता संहिता वर्णानां यत्र अथवा विरूपः नाम पदानां विकृतसन्धिः यत्र भवति तत्र विसन्धिवाक्यदोषः। यथा - 'शौर्याणि, ईदृशान्यासन् पृथ्वैश्वर्यं क्व वा गतम्।' अत्र शौर्याणि ईदृशानीति इत्यत्र सवर्णदीर्घाभावात् विसन्धिः। पृथ्वैश्वर्यमिति सन्धिवैरूप्यम्।

**स्वावलोकनप्रश्नाः**

(१) ग्रन्थकारेण कवि वाक्यदोषाः व्यपदिष्टाः?

(२) शब्दहीनवाक्यदोषः कदा भवति?

(३) विसन्धिवाक्यदोषस्य लक्षणं प्रतिपादयत?

**(४) पुनरुक्तिमत्वाक्यदोषः**

लक्षणम् - शब्दार्थपौनरुकत्ये तु तद्वाक्यं पुनरुक्तिमत्।

यस्मिन् वाक्ये शब्दार्थस्य पुनरुक्तिः तत्र पुनरुक्तिमत्वाक्यदोषः। यथा - 'जीर्णकाननसङ्कीर्णे विन्ध्ये काननवृत्तयः।' अत्र काननसङ्कीर्णे काननवृत्तयः इति पुनरुक्तिमत्वाक्यदोषः।

**(५) व्याकीर्णवाक्यदोषः**

लक्षणम् - व्याकीर्णं तद्विभक्तीनां व्याकीर्णे च मिथोऽन्वये।

विभक्तीनां परस्परान्वयः यत्र विकीर्णः तत्र व्याकीर्णवाक्यदोषः।

यथा - सुखार्थिनो महीपाला वर्तध्वं काकतीशितुः।
आज्ञामुरसि बिभ्राणाः शिरसि क्रोडमुद्रिकाम्।।

अत्र क्रोडमुद्रिकामुरसि शिरस्याज्ञां बिभ्राणा इति सम्बन्धः आवश्यकोऽसीत्। परं तथा वाक्ये नैव दृश्यते तस्मात् व्याकीर्णवाक्यदोषः।

**(६) वाक्यसङ्कीर्णवाक्यदोषः**

लक्षणम् - वाक्यान्तरपदैः कीर्णं वाक्यसङ्कीर्णमुच्यते।

यत्र वाक्यान्तरस्य पदानि वाक्यान्तरमनुप्रविशन्ति तत्र वाक्यसङ्कीर्णदोषः।

यथा - मानेन महतास्मभिर्वने वक्त्रे न तिष्ठताम्।

विन्ध्यस्य जीवितं तन्नो जातमद्य तृणं कृतम्।

अत्र महता मानेन अस्माभिःयत्तृणं वक्त्रे न स्थापितं तदद्य विन्ध्यस्य वने तिष्ठतां अस्माकं जीवितं जातमिति वाक्यद्वयपदानाम् अन्योन्यसङ्कीर्णता।

**(७) अपूर्णवाक्यदोषः**

लक्षणम् - अपूर्णं तद्भवेद्यत्र न सम्पूर्णः क्रियान्वयः।

कर्तृकर्मवाचकयोः पदयोः क्रियया नान्वयः यत्र तदा अपूर्णवाक्यदोषः।

यथा - शैलेष्वस्माकमावासो वन्यैः सोच्छवसिता वयम्।
मृगैर्बन्धुमतंश्चास्मान् पश्यन् धाता प्रमोदताम्।।

अत्र शैलवासान् वन्यवृत्तीन् मृगबान्धवान् पश्यन्निति विवक्षितः सम्बन्धो न सम्पूर्णः। क्रियान्वयापरिपूरणादपूर्णवाक्यदोषः।

**(८) वाक्यगर्भितवाक्यदोषः**

लक्षणम् - तद्वाक्यगर्भितं यस्य मध्ये वाक्यान्तरं भवेत्।

यत्र वाक्यस्य मध्ये वाक्यान्तरमनुप्रविशति तत्र वाक्यगर्भितदोषः। ज्ञातव्यं यत् वाक्यान्तरे अन्यवाक्यीयपदप्रवेशे सङ्कीर्णता परम् अन्यवाक्यस्यैव प्रवेशे तु गर्भितत्वमिति।

उदाहरणार्थम् - ज्ञात्वाप्यन्ध्रपुरीन्द्रस्य क्रोधाग्निमतिदुःसहम्।
यद्वा न लङ्घयते दैवं तस्मिन्निपतिता वयम्।।

अत्रातिदुःसहं क्रोधाग्निं ज्ञात्वापि तस्मिन्निपतिता वयमिति वाक्ये यद्वा न लङ्घयते दैवमिति वाक्यान्तरमनुप्रविष्टमिति वाक्यगर्भितत्वम्।

**(९) भिन्नलिङ्गवचनवाक्यदोषः**

लक्षणम् - यत्रोपमा भवेद्भिन्नवचना भिन्नलिङ्गका।
तद्भिन्नवचनं भिन्नलिङ्गं चाहुर्मनीषिणः।।

यत्र उपमायाः भिन्नवचनत्वं भिन्नलिङ्गत्वञ्च वर्तते तत्र भिन्नलिङ्गवाक्यदोषः तथा च भिन्नवचनवाक्यदोषः सम्भवति। उदाहरणार्थम् -

समुद्रा इव गम्भीरं मनो यादवभूभुजः।
गिरिणेवान्ध्रनृपतिध्वजिन्या कलुषीकृतम्।।

अत्र समुद्रा इव गम्भीरं मन इत्यत्र उपमानोपमेययोः भिन्नवचनत्वम्। तथैव गिरिणेव

ध्वजिन्येति भिन्नलिङ्गत्वम्।

**(१०) अधिकन्यूनोपमावाक्यदोषः**

लक्षणम् - यत्रोपमानमधिकं न्यूनं वा स्याद्विशेषणैः।
तत्राधिकोपमं पूर्वं न्यूनोपममतः परम्।।

यत्र विशेषणैः उपमानमधिकं तत्राधिकोपमावाक्यदोषः। अपि च यत्र न्यूनविशेषणोपमानं तत्र न्यूनोपमम्। उदाहरणार्थम् -

क्षामक्षाममुखाः कान्ताः कानने मालवेशितुः।
ग्रीष्मे नद्य इव म्लानपद्मोत्पलबिसाविलाः।।

अत्र क्षामक्षाममुखानां कान्तानामुपमानभूतासु नदीषु म्लानपद्मत्वमात्रं वक्तव्यम्। म्लानोत्पलबिसाला इत्यधिकम्।

हाराङ्गरागसुभगा नगरेषु यथा वयम्।
तथैव निर्झराकीर्णा विभान्ति धरणीभृतः।।

अत्र हारस्थाने निर्झरा उक्ताः। अङ्गरागस्थाने किमपि नोक्तामिति न्यूनोपमत्वम्।

**स्वावलकोनप्रश्नाः**

(१) शब्दार्थपौनरुकत्ये को दोषः?

(२) विभक्तीनां व्याकीर्णता कस्मिन् दोषे उपलभ्यते?

(३) मनीषिणः भिन्नलिङ्गवचनवाक्यदोषं कदा मन्यन्ते?

(४) वाक्यगर्भितवाक्यसङ्कीर्णयोः को भेदः?

**(११) भग्नच्छन्दो वाक्यदोषः**

लक्षणम् - छन्दोभग्न वचो यत्र तद्भग्नच्छन्द उच्यते।

भग्नं छन्दो नाम वृत्तं यत्र तच्छन्दोभग्नम्। पिङ्गलादिप्रणीतं छन्दसः लक्षणं यत्र नैव उपयुज्यते। उदाहरणम् - अधो निर्दिश्यते।

**(१२) यतिभ्रष्टवाक्यदोषः**

लक्षणम् - यत्र स्थाने यतिभ्रंशस्तद्यतिभ्रष्टमुच्यते।।

यतिः इत्युक्ते विच्छेदः। वर्णयोः विच्छेदः यत्र भ्रष्टः तत्र यतिभ्रष्टदोषः।

उदाहरणार्थम् - 'विन्ध्यारण्यकुटुम्बरक्षस्य किं भद्रं भवति जनस्य मादृशस्य।'

अत्र विन्ध्यारण्येति तृतीयवर्णे यतिभङ्गः। पादान्तवर्णस्य गुरुत्वाभावाच्छन्दोभङ्गः। प्रहर्षिणीवृत्ते तृतीयदशमवर्णयोर्विच्छेदो विहितः वृत्तरत्नाकरे। अत्र तृतीयवर्णे तदभावाद्यतिभ्रष्टदोषः।

**(१३) अशरीरवाक्यदोषः**

लक्षणम् - क्रियापदेन रहितमशरीरं प्रकीर्त्यते।

क्रियापदविरहितं वाक्यम् अशरीरवाक्यदोषं प्रदर्शयति।

यथा - हन्त निष्करुणो धाता क्रीडतो मणिकुट्टिमे।
कानने कण्टकाकीर्णे स्थितान् पाण्डया शिशूनिमान्।।

अत्र क्रियापदं न विहितम्। क्रियापदराहित्येन अन्वयाभावात् अशरीरवाक्यदोषः। अनन्वय इत्यस्यैव दोषस्य नामान्तरम्।

**(१४) अरीतिकवाक्यदोषः**

लक्षणम् - रसाननुगुणा रीतिर्यत्रारीति तदुच्यते।

यत्र रसाननुगुणा नाम रसविरुद्धा रीतिः तत्र अरीतिकदोषः।

यथा - अखर्वगर्वदुर्वारदीर्गलरर्गलाः।

हा बन्धुवर्गाः सर्वेऽपि कृतान्तातिथयः कृताः।।

अत्र वर्णपारुष्यदीर्घसमासादिनिबन्धतायाः गौडरीतेः करुणानुचितायाः निबन्धनात् अरीतिकं नाम दोषः। अत्र हि करुणे अनुचितो वर्णाडम्बरः।

### (१५) विसर्गलुप्तवाक्यदोषः

**लक्षणम्** - ओत्वं लोपो विसर्गस्यासकृल्लुप्तविसर्गकम्।।

यत्र विसर्गो बहुधा ओत्वं लोपं वा प्राप्नोति। विसर्गादर्शनात् लुप्तविसर्गेति व्यवहारः।

यथा - व्यर्थो मनोरथो यातो जातो वासो ध्रुवो मरौ।

म्लाना दिना हता जीर्णा वनान्तेष्वीदृशा वयम्।।

'व्यर्थो मनोरथो . . .' इत्यादौ यद्यपि विसर्जनीयस्य सत्वादिसन्धिकार्यवशात् गुणे सत्योत्वमेव न विसर्गलोपः। तथापि विसर्गादर्शनाल्लुप्तविसर्गेति व्यवहारः। तथैव 'म्लाना' इत्यादौ परम्परया विसर्जनीयस्थानिकस्य यकारस्य 'हलिसर्वेषाम्' इति लोपविधानात् लुप्तविसर्गत्वम्।

### (१६) अस्थानसमासवाक्यदोषः

**लक्षणम्** - 'अपदस्थसमासं तत् समासो यत्र नोचितः।

स्पष्टमेव यत् समासस्य अनुचितता यत्र तत्र अपदस्थसमासदोष इति।

यथा - कुतो वैमुख्यमस्मासु ब्रह्मणः परुषात्मनः।

इत्युदग्रतरभ्राम्यदभ्रुकुटीकुटिलाननाः।।

अत्र वेधसे क्रुध्यतां नृपाणामुक्तौ न समासः। किन्तु कविवचने समास इत्यपदस्थसमासदोषः।

### (१७) वाच्यवर्जितवाक्यदोष :

लक्षणम् - 'नोक्तं स्याद्यत्र वक्तव्यं तदाहुर्वाच्यवर्जितम्।।

वाक्ये यत् वक्तव्यं तद् नोक्तं चेत् वाच्यवर्जितदोषः। यथा -

दुर्दशां प्रतिपन्नानामस्माकं जीवितं मतम्।।

अत्र दुर्दशां प्रतिपन्नानामपि इत्यपि शब्दो वक्तव्यो नोक्तः।

### (१८) समाप्तपुनरात्तकं पतत्प्रकर्षं च वाक्यदोष :

लक्षणम् - समाप्य पुनरादाने समाप्तपुनरात्तकम्।

पतत्प्रकर्षं तत्प्राहुः प्रकर्षो यत्र विश्लथः।।

समाप्तस्य वाक्यस्य विशेषणद्वारा पुनरुपादाने समाप्तपुनरात्तकदोषः। तथैव प्रकर्षस्य यत्र वाक्ये उत्तरोत्तरं पातो वर्तते तत्पतत्प्रकर्षम्। यथा -

धावमृगेषु सम्भ्राम्यत्करिषूद्यत्तरक्षुषु।
विन्ध्यारण्येषु तिष्ठामः क्षुभ्यद्भल्लूकपङ्क्तिषु।।

अत्र विन्ध्याख्येषु तिष्ठामः इति समाप्य क्षुभ्यद्भल्लूकपङ्क्तिषु इति पुनरादानात् समाप्तपुनरात्तकम्। अथ भ्राम्यत्करिषूद्यत्तरक्षुषु धावन्मृगेषु इति वक्तव्ये न तथोक्तामिति पतत्प्रकर्षता। करिणां प्रकृष्टत्वात् पूर्वमुपादानं, मृगाणां पुनरपकृष्टत्वात् पश्चादेवोचितं तथापि मृगाणामादावुपादाने प्रकर्षभ्रंशात् पतत्प्रर्षमिति।

**(१९) सम्बन्धवर्जितवाक्यदोषः**

लक्षणम् - सम्बन्धवर्जितं तत् स्याद्यत्रेष्टेनान्वयो हतः।

सम्बन्धेन इष्टयोगेन वर्जितं सम्बन्धवर्जितम्। पदार्थयोरन्वयस्यैव असम्भवः तत्र।

यथा - भद्रासनानि दृषदः छत्राणि च महीरुहः।
दुर्दशाराज्यमूर्धाभिषिक्ताः पुनरहो वयम्।।

अत्र दुर्दशाराज्यशब्दः समासे गुणीभूत इति न तदर्थो भद्रासनादिभिः सम्बध्यते। तेन हि सम्बन्धवर्जितवाक्यदोषः समभवत्।

**(२०) अधिकपदवाक्यदोषः**

लक्षणम् - यत्राधिकपदोक्तिः स्यात् तत्राधिकपदं मतम्।

यस्मिन् वाक्ये अधिकमंशं विविनक्ति तत्र अधिकपदवाक्यदोषः। अधिकपदानामुक्तिः तत्रैव अयं दोषः समुद्भवति।

यथा - विमुक्ता वल्लभैरेता वनान्ते घूर्जरास्त्रियः।
सुधांशुमण्डलाकाररूपक्रमविपाण्डुराः।।

अत्र सुधआंशुपाण्डुरा इत्येतावता परिपूर्णे मण्डलाकाररूपक्रम इत्यधिकं वर्तते

**(२१) भग्नप्रक्रमम्**

लक्षणम् - प्रकान्तनियमत्यागे भग्नप्रक्रममुच्यते।

प्रकान्तः इत्युक्ते आरम्भः। आरब्धनियमस्य परित्यागः भग्नप्रक्रमत्वम्। भग्नो नष्टः

प्रक्रमः उपक्रमः यत्र वाक्ये।

यथा - गुहा गृहाणि शबरा बान्धवा विन्ध्यभूः पुरी।
सरितो दीर्घिकाः कष्टमाक्रीडाः काननानि नः।।

अत्र बहुवचनतया प्रथमं प्रक्रम्य विन्ध्यभूः पुरीत्येकवचनोक्तेः प्रक्रमभ्रष्टमवाक्यदोषः अस्ति।

इत्थं वाक्यदोषाः समुपवर्णिताः।

**स्वावलोकनप्रश्नाः**

(१) समासो यत्र नोचितः तत्र को वाक्यदोषः?

(२) वाच्यवर्जितवाक्यदोषः कदा समुद्भवति?

(३) वाक्ये अधिकपदोक्तिः कस्य दोषस्य कारणम्?

(४) भग्नप्रक्रमवाक्यदोषस्य किं लक्षणम्?

### ३.२.३ अर्थदोषाः

अथ शब्ददोषान् वाक्यदोषान् चाभिधाय इदानीम् अर्थदोषान् आह ग्रन्थकारः। एवम् अष्टादश अर्थदोषाः प्रोक्ता। ते च अधो निर्दिष्टाः।

| | | | |
|---|---|---|---|
| (१) अपार्थम् | (२) व्यर्थम् | (३) एकार्थम् | (४) ससंशयम् |
| (५) अपक्रमम् | (६) भिन्नम् | (७) अतिमात्रम् | (८) परुषम् |
| (९) विरसम् | (१०) हीनोपमम् | (११) अधिकोपमम् | (१२) असदृशोपमम् |
| (१३) अप्रसिद्धोपमम् | (१४) हेतुशून्यम् | (१५) निरलङ्कृतिः | (१६) अश्लीलम् |
| (१७) विरुद्धम् | (१८) सहचरच्युतम् | | |

अधुना एकैकशः तस्य अर्थदोषस्य स्वरूपमुदाहरणं च स्पष्टीक्रियते।

**(१) अपार्थम्**

लक्षणम् - समुदायार्थशून्यं यदपार्थं तत् प्रकीर्त्यते।

समुदायार्थशून्यम् नाम वाक्यार्थशून्यम्। वाक्यार्थशून्यता एव अपार्थदोष इति।

यथा - कुतः शुष्यदपा नद्यः का वार्ता चोलमण्डले।
फणाः सहस्रं शेषस्य भारः कति कुलाचलाः।।

अत्र न कश्चित्वाक्यार्थः प्रतीयते तस्माद् अपार्थत्वम्।

**(२) व्यर्थम्**

लक्षणम् - यत् प्रयोजनशून्यं स्यात् तद् व्यर्थं परिकीर्त्यते।

स्पष्टमेव। प्रयोजनरहितता नाम व्यर्थत्वम्।

यथा - निर्मलं कुलमुद्वेलं शौर्यं वः प्रथितं यशः।
किमित्यन्ध्रपतेः पादपीठं पाण्डयैर्न सेव्यते।।

अत्र निर्मलं कुलमित्यादिप्रशंसा, सेवा कर्तव्येत्युपदेशे नोपयुज्यते। तेन हि व्यर्थत्वम्।

## (३) एकार्थम्

लक्षणम् : उक्ताभिन्नार्थकं यत् स्यादेकार्थं तन्निगद्यते।

पूर्वार्धे उक्तार्थः उत्तरार्धेऽपि प्रोक्तश्चेत् अभिन्नार्थत्वम्। स एव एकार्थदोषः।

यथा - विशीर्णं शतधा चेतो मूर्च्छितान् वीक्ष्य बालकान्।
शिशून् निश्चेतनान् दृष्ट्वा खण्डतं शतशो मनः।।

अत्र पूर्वोत्तरार्धयोरभिन्नार्थत्वम्। अर्थस्य पुनरुक्तिः अतः एकार्थदोषः।

## (४) ससंशयम्

लक्षणम् : वाक्यार्थसंशयो यत्र तत् ससंशयमिष्यते।

यस्मिन् वाक्यार्थे संशयः विद्यते तत्र ससंशयदोषः।

यथा - करिकुम्भौ स्तनावद्य जयतां क्षामतां गतौ।
लता वपुःश्रियः स्त्रीणां हसन्तु म्लानतां गताः।।

अत्र करिकुम्भयोः स्तनयोश्च लतानां वपुःश्रियां च कर्तृकर्मत्वसंशयः। तेन हि ससंशयदोषः।

## (५) अपक्रमम्

लक्षणम् - यत्र पूर्वापरीभावविहतिस्तदपक्रमम्।

पूर्वापरीभावविहतिः इत्युक्ते पौर्वापर्यविहतिः यत्र भवति तत्र अपक्रमदोषः।

यथा - हन्त व्यादाय वक्त्राणि निद्रान्त्यन्तर्वणं स्त्रियः।
तृणैस्तत्पतितैरस्मान् शिक्षयन्त्यस्तथाक्रमम्।।

अत्र निद्रोत्तरकालीनमुखव्यादानस्य पूर्वकालत्वमुक्तम् इति अपक्रमत्वम्।

## (६) भिन्नम्

लक्षणम् - सम्बन्धवर्जितं यत् स्यात् तद्भिन्नं परिकीर्त्यते।

यत्र अर्थस्य सम्बन्धरहितत्वं तत्र भिन्नदोषः।

यथा - नूनं गालेषु लाटानां न धात्रा लिखिता लिपिः।
यदस्माकं कुटुम्बानि विषीदन्ति मरुस्थले।।

अत्र मरुस्थलनिवासविषादस्य तथा च भालस्थलगतलिप्यभावस्य न कोऽपि सम्बन्धः। अतः भिन्नार्थदोषः।

## (७) अतिमात्रम्

लक्षणम् - यत् सर्वलोकातीतं तददतिमात्रं प्रकीर्त्यते। स्पष्टमेव।

यथा - मा भूदेकार्णवं विश्वमिति सङ्कोचिताश्रुभिः।
अरण्ये लाटनारीभिरसङ्ख्या निम्नगाः कृताः।।

एकार्णवभिया अश्रुसङ्कोचेऽपि असङ्ख्या नद्यः प्रवृत्ता इत्यतिमात्रालौकिकार्थप्रतिपादनात् अत्युक्तिरेवायं दोषः। अश्रुभिः जगदेकार्णवमिति अत्युक्तिरेव अतिमात्रदोषः भवति।

स्वावलोकनप्रश्नाः

(१) ग्रन्थकारेण कति अर्थदोषाः प्रतिपादिताः?

(२) यत्र प्रयोजनशून्यत्वं तत्र कोऽर्थदोषः?

(३) एकार्थस्य किं लक्षणं प्रोक्तम्?

(४) वाक्यार्थसंशये जाते कः दोष उपपद्यते?

(५) 'मा भूदेकार्णवं . . .।' इत्यस्मिन् उदाहरणे कः दोषः निर्दिष्टः?

**(८) परुषम्**

लक्षणम् - अतिक्रूरार्थसहितं परुषं परिकीर्त्यते।

यत्र अतिक्रूरार्थेन परिपूर्णोऽर्थः तत्र परुषदोषः। यथा -

दावानलेन्धनं सद्यः क्रियन्तामर्भका इमे।

अत्र फलानि याचमानान् शिशूनुद्दिश्यातिपरुषोक्तिः।

**(९) विरसम्**

लक्षणम् - अप्रस्तुतरसं यत् तद्विरसं परिकीर्त्यते।

अनौचित्यप्रवृत्तत्वात् अप्रस्तुतरसनिर्मितिः। ततः विरसदोषः उद्भवति।

यथा - चन्द्राननाः कटाक्षैर्नः पश्यतामृतवर्षिभिः।

शोचित्वालमिति क्लिष्टाः किरातैश्चोलसुभ्रुवः।।

अत्र पतिवियोगखिन्नानां स्त्रीणां वनचरैः सम्भोगप्रार्थना क्रियते अतः विरसम्।

**(१०) हीनोपमम्**

लक्षणम् - हीनं यत्रोपमानं स्यात् तद्धि हीनोपमं मतम्।

यत्र उपमानस्य हीनत्वं तत्र हीनोपमम्। यथा -

शुनकैरिव सारङ्गा भवद्भिर्निहता द्विषः।

क्व गतं पौरुषं तद्वः काननैकनिवासिनाम्।।

अत्र शुनकैरिव भवद्भिरिति हीनोपमम्। अत्र वीराणां कृते शुनकोपमा नैव युज्यते।

**(११) अधिकोपमम्**

लक्षणम् - यत्रोपमानमधिकं तद् भवेदधिकोपमम्।

स्पष्टं यत् उपमानस्य आधिक्यमेव अधिकोपमम्।

यथा - अमी पारेसरस्तीरं बका निश्चलमूर्तयः।

महर्षय इवास्माभिरद्य सोपद्रवाः कृताः।।

अत्र बका महर्षय इवेत्या धिकोपमम्। सरसः मध्ये तीरे च बकाः महर्षयः इव निश्चलमूर्तयः तिष्ठान्ति। अत्र महर्षीणामुपमा बकानां कृते प्रदत्ता।

## (१२) असदृक्षोपमम्

लक्षणम् - यदतुल्योपमानं तद् भवेदसदृक्षोपमम्।।

यत्र उपमेयतुल्यम् उपमानं न भवति तत्र असदृक्षोपमम्।

यथा - एष विन्ध्याचलः सान्द्रकुञ्जोच्चलितनिर्झरः।
भालेक्षणस्फुरद्वह्निशिखाटोप इवेश्वरः।।

अत्र कुञ्जोच्चलितनिर्झरस्य विन्ध्याचलस्य भालेक्षणस्फुरद्वह्नेरीश्वरस्य च परस्परं न सादृश्यम्। अतः असदृक्षोपमम्।

## (१३) अप्रसिद्धोपमम् :

लक्षणम् - अप्रसिद्धोपमानं यदप्रसिद्धोपमं मतम्।

उपमानस्य अप्रसिद्धतैव अप्रसिद्धोपमदोषः।

यथा - बाष्पाम्बुक्लिन्ननेत्राणि मुखान्यङ्ग मृगीदृशाम।
हिमदूषितपत्राणि कुमुदानीव निर्मुदाम्।

अत्र मुखानां कुमुदान्युपमानतया कविलोके न प्रसिद्धानि।

## (१४) हेतुशून्यम् :

लक्षणम् - हेतोर्विनार्थकथनं हेतुशून्यं प्रचक्षते।

हेतुना विना इत्युक्ते प्रयोजनेनिवना अर्थकथनं हेतुशून्यमिति।

यथा - मुधानुधावनं जातं मार्गेऽस्मिन् मौक्तिकाङ्किते।
अन्वेष्टुमन्यतो यामि पदवीयं न सुभ्रुवः।।

अत्र सुभ्रुवः पदवीयं न भवतीति हेतुः नोक्तः। सुभ्रुवः गमनं किमर्थं नोति नोक्तम्।

## (१५) निरलङ्कृति :

लक्षणम् - अलङ्कारेण रहितं निरलङ्कारमुच्यते।

स्पष्टमेवा। यथा - आघ्राय सुरभेर्योनिमुन्मुखैर्दीर्घमेहनैः।
महोक्षैर्लम्बमानाण्डैर्विष्वग्व्याकुलितं वनम्।।

अत्र न कश्चिदलङ्कारः। तेन हि निरलङ्कृतिः।

### (१६) अश्लीलम् :

लक्षणम् - अश्लीलार्थस्य कथनमश्लीलं परिकीर्त्यते।

अश्लीलार्थस्य नाम अमङ्गलजुगुप्साव्रीडाबुद्धिजनकस्य इत्यर्थः। पूर्वोक्ते उदाहरणे अश्लीलार्थदोषोऽपि विद्यते।

### (१७) विरुद्धम् :

लक्षणम् - विरुद्धं देशकालादिविरुद्धं बहुधोच्यते।

देशकालादीत्यादिशब्देन विद्यास्वभावादय गृह्यन्ते। एवं देशकालविरुद्धार्थः विरुद्धमिति।

यथा - दिश्युत्तरस्यां नेदीयानुद्वेलो लवणार्णवः।
मरुदेशोऽपि गङ्गा नः पिपासां शामयिष्यति।।

अत्रोत्तरस्यां दिशि लवणार्णव इति दिग्विरोधः। मरुस्थले गङ्गेति देशविरोधोऽस्ति। तेन हि विरुद्धमत्वम्।

### (१८) सहचरभ्रष्टम् :

लक्षणम् - मतं सहचरभ्रष्टमतुल्यानां निबन्धने।

असमानपदार्थानां निबन्धने सहचरभ्रष्टदोषः। सहचरच्युतमित्यपि अस्य अपरा संज्ञा।

यथा - शान्त्या श्रुतं ह्रिया नारी मनमथेन रतोत्सवः।
श्रुतेन धिषणा वन्यवृत्त्या जीवन्ति शात्रवाः।।

वन्यवृत्त्या जीवन्ति शात्रवाः इत्येतत्तु सर्वापकृष्टत्वात् सर्वेभ्यः सहचरेभ्यो भ्रष्टमिति। यतो हि श्रुतधिषणाभ्यां शान्तिश्रुतालङ्कृत्वेन सर्वेषाम् अत्यन्तोपादेयतया सर्वोत्कृष्टाभ्यामित्यर्थः। नारीरतोत्सवयोः लज्ञामन्मथसमवेतयोः कतिपयोपादेयतया अपकृष्टत्वात् अत्र सहचरभ्रष्टदोषः।

एवं दोषान्तरणि यथासम्भवम् ऊह्यानि। रसभावादीनां स्वशब्दवाच्यता दुष्टैव इति।

स्वावलोकनप्रश्नाः

(१) परुषार्थदोषः कदा परिकीर्त्यते?

(२) हेतोर्विनार्थकथनं कस्मिन् दोषे सम्भवति?

(३) निरलङ्कृति इत्यक्य कोऽर्थः ?

(४) असदृक्षोपमम् अर्थदोषः कदा उद्भवति ?

(५) सहचरभ्रष्टम् इत्यास्य कीदृशं लक्षणं कृतम् ?

## ३.३ उपसंहारः

आस्मिन् दोषप्रकरणे दोषस्वरूपं प्रतिपाद्य दोषप्रकाराः प्रदर्शिताः। तत्र हि पद-वाक्य-अर्थोति दोषः त्रिधाति। ततः ग्रन्थकारेण प्रोक्ताः पददोषविचाराः, वाक्यदोषप्रकाराः तथा च अर्थविकारेण समुद्भूताः दोषाः सोदाहरणं परिचाययिताः। अस्य प्रकरणस्य साहाय्येन काव्यगतदोषपरीक्षणं विधातुं सामर्थ्यमाप्नोतीति निश्चप्रचम्।

१.४ प्रतापरुद्रीयम् - तृतीयखण्डप्रश्नाः

(१) दोषस्वरूपं विवेच्य दोषप्रकारान् सङ्क्षेपेण प्रतिपादयत।

(२) पददोषान् सोदाहरणं विवेचयत।

(३) 'प्रतापरुद्रीयम्' इत्ययं ग्रन्थमधिकृत्य वाक्यदोषान् चर्चयत।

(४) श्रीविद्यानाथदिशा अर्थदोषविवरणं कुरुत।

(५) पञ्चपददोषान् पञ्चवाक्यदोषान् पञ्चार्थदोषान् च सोदाहरणं विवृणुत।

(६) सलक्षणं व्याख्यात -

(१) सन्दिग्धपददोषः (२) गूढार्थपददोषः
(३) शब्दहीनवाक्यदोषः (४) भिन्नलिङ्गवचनवाक्यदोषः
(५) विसर्गलुप्तवाक्यदोषः (६) भग्नप्रक्रमवाक्यदोषः
(७) एकार्थदोषः (८) हेतुशून्यार्थदोषः

# चतुर्थखण्डः
# गुणप्रकरणम्

**संरचना**

४.० प्रस्तावना।
४.१ लक्षिताधिगमविशेषाः।
४.२ गुणविवेचनम्।
४.२.१ गुणनिरूपणम्।
४.२.२ गुणस्वरूपमुदाहरणञ्च।
४.३ उपसंहारः
४.४ प्रश्नाः

## ४.० प्रस्तावना

अस्मिन् जगति मानवेषु सद्गुणाः दुर्गुणाश्च वर्तन्ते। इमे गुणाः एव सज्जनत्वं दुर्जनत्वपरिचायकाः। सर्वविदितमेव यत् सद्गुणैः मानवस्य अभ्युत्थानं दुर्गुणैश्च अधोगतिरिति। वस्तुतः इदं गुणनिधानं न केवलं मानवमर्यादितमपि तु काव्यशास्त्रेऽपि प्रतिपादितोऽयं विषयः। वामनादयः आलङ्कारिकाः स्वकीयग्रन्थेषु एनां काव्यगुणचर्चाम् अकुर्वन्। सम्प्रत्यत्र 'प्रतापरुद्रीयम्' इत्यस्मिन् ग्रन्थे ग्रन्थकारेण विद्यानाथेन समुपस्थापितं 'गुणप्रकरणम्' निरूप्यते।

## ४.१ लक्षिताधिगमविशेषाः

- प्रकरणेऽस्मिन् भवान् / भवती अधोनिर्दिष्टान् विषयान् अवगन्तुं शक्नोति।
- काव्यगुणान् अवगच्छति।
- गुणस्वरूपमवगत्य अन्यत्र तेषां विनियोगं कर्तुमर्हति।
- शब्दार्थगुणानां परीक्षणसामर्थ्यमाप्नोति।
- अन्यालङ्कारग्रन्थेषु उल्लिखितान् काव्यगुणान् अवलोकयितुमुत्सहते।

## ४.२ गुणविवेचनम्

लावण्यशौर्यादिगुणाः मानवसौन्दर्यधायकाः तद्वदेव काव्यगुणाः काव्यसौन्दर्यवर्धकाः भवन्ति। गुणमात्रविशिष्टकाव्यं युवत्याः रूपमिव रोचते रसिकेभ्यः। तस्मादेव 'काव्यशोभायाः कर्तारो धर्माः गुणाः' इति वामनाचार्यः प्रत्यपादयत्। मम्मटस्तु 'काव्यस्य उत्कर्षहेतवः गुणाः' इति भिव्यनक्ति। तदुक्तं रुद्रभट्टेनापि 'गुणोऽपि तादृशो ज्ञेयो दोषः स्यात्तद्विपर्ययः' इति। एवं काव्यस्य चारुत्वसम्पादनाय गुणाः अभिलषन्ते। परमेते गुणाः कतिपयः इत्या स्मिन् विषये आलङ्कारिकेषु मतभेदाः सम्भवन्ति। तत्र गुणास्त्रयः इति भामहादयः। दशेति वामनादयः। चतुर्विंशतिरिति भोजराजः। शब्दार्थे काव्यशरीरे अचलत्वेन स्थिताः गुणाः काव्यशोभासंवर्धकास्सन्ति। तेन हि तेषां ज्ञानम् अत्यावश्यकमिति धिया पाठ्यांशरूपेण विनियोजितमत्र गुणप्रकरणम्।

**स्वावलोकनप्रश्नाः**

(१) वामनाचार्यस्य गुणव्याख्यां लिखत।

(२) भामहादयः कति गुणाः अनुमन्यन्ते?

(३) काव्यस्य उत्कर्षहेतवः के?

(४) भोजराजमतेन कति गुणाः सान्ति?

### ४.२.१ गुणनिरूपणम्

ग्रन्थकारेण श्रीविद्यानाथेन अधोनिर्दिष्टाः गुणाः प्रतिपादिताः।

श्लेषः प्रसादः समता माधुर्यं सुकुमारता।
अर्थव्यक्तिरुदारत्वं तथा कान्तिरुदात्तता।।
ओजः सुशब्दता प्रेयानौर्जित्यमथ विस्तरः।
समाधिः सौक्ष्म्यगाम्भीर्ये सङ्क्षेपो भाविकं तथा।।
सम्मितत्वं तथा प्रौढी रीतिरुक्तिर्गतिस्तथा।
चतुर्विंशतिरेते स्युर्गुणाः काव्यप्रकाशकाः।।

इत्थं चतुर्विंशतिः गुणाः काव्येषु विलसन्ति। तेषु केषाञ्चिद् दोषपरिहारकत्वेन गुणत्वम्। केषाञ्चित् स्वतः एवोत्कर्षहेतुत्वाद् गुणत्वम्। तत्र ये स्वतः एव चारुत्वातिशयहेतवस्ते परमुत्कृष्टाः। दुष्टत्वपरिहारहेतूनां गुणत्वं न सर्वसम्मतम्। ये तु दोषाभावतया गुणत्वमिच्छन्ति तेषामेव सौकुमार्यादयो गुणत्वेन सम्मताः। श्रुतिकटुत्वरूपदोषनिराकरणाय सौकुमार्यम् अङ्गीकृतम्। ग्राम्यत्वदोषनिराकरणाय कान्तिः स्वीकृता। अपुष्टार्थनिवारणाय अर्थव्यक्तिर्मता।

न्यूनाधिकपदत्वनिराकरणाय सम्मितत्वमिति। अनुचितार्थत्वनिरा- करणार्थमुदात्तता स्वीकृता। विसन्धित्वविनिवारणाय और्जित्यं मतम्। पतत्प्रकर्षनिराकरणाय रीतिरिष्टा। क्लिष्टत्वपरिहाराय प्रसादो गुण। अश्लीलत्वपरिहारार्थम् उक्तिः स्वीकृता। च्युतसंस्कारत्वपरिहारार्थं सौशब्द्यमिष्टम् प्रक्रमभङ्गत्वनिवारयितुं समता गुणस्य अङ्गीकारः कृतः। परुषत्वदोषनिवृत्त्यर्थं प्रेयान् गुणः प्रयुक्तः। एवं केषाञ्चित् दोषपरिहारकत्वेन गुणत्वमिति ग्रन्थकारः अभिप्रैति।

**स्वावलोकनप्रश्नाः**

(१) श्रीविद्यानाथेन कति काव्यगुणाः प्रतिपादिताः?

(२) कान्तिरिति गुणः किमर्थं स्वीकृतः?

(३) समता गुणस्य अङ्गीकारः केनोद्देशेन प्रोक्तः?

(४) के गुणाः परमुत्कृष्टाः?

(५) श्रुतिकटुत्वरूपदोषः केन गुणेन परिह्रियते?

४.२.२ गुणस्वरूपमुदाहरणञ्च

ग्रन्थकारः प्रकरणेऽस्मिन् यान् चतुर्विंशतिःर्गुणान् पर्यगणयत् तेषां स्वरूपमुदाहरणञ्चाधुना विशदीक्रियते।

**(१) श्लेष :**

लक्षणम् - 'मिथः संश्लिष्टपदता श्लेष इत्यभिधीयते।'

बहूनां पदानामेकपदवदवभासमानत्वं श्लिष्टत्वम्। सुबहून्यपि पदानि यत्रैकपदवत् भान्ति तत्रैव संश्लिष्टता। इयं संश्लिष्टता 'श्लेषः' इति कथ्यते।

उदाहरणार्थम् - श्रीमत्काकतिवीररुद्रमशिलक्ष्मापालमौलिस्फुर
न्माणिकयद्युतिरञ्जिताङ्घ्रिमखिलप्रख्यातशौर्योदयम्।
विश्वत्राणविनिद्रमक्षयगुणज्यौत्स्नावितानावृत
व्योमागारमनल्पवैभवममुं स्तोतुं वयं नेश्महे।।

वस्तुतः अत्र पदानां पृथकत्वमस्ति किन्तु एकपदवदाभासः वर्तते। तस्मात् श्लेषः इति। काकतिवीररुद्रस्य स्तवनाय वयम् अक्षमाः इत्येवात्र आशयः।

**(२) प्रसाद :**

लक्षणम् - प्रसिद्धार्थपदत्वं यत् स प्रसादो निगद्यते।

यत्र झटित्यर्थप्रकाशनपदत्वं तत्र प्रसादगुणः। पदार्थावगमनं तत्क्षणमेव यत्र तत्रैव प्रसादो इति।

यथा - प्रतापरुद्रदेवोऽयं भाति लक्ष्मीपतिः स्वयम्।
येनास्य लोचने फुल्लपुण्डरीकमनोहरे।।
श्लोकेऽस्मिन् झटित्यैव अर्थसमर्पकपदत्वात् प्रसादगुणः।

**(३) समता :**

लक्षणम् - अवैषम्येण भणनं समता सा निगद्यते।
पदोच्चारणे वैषम्यरहितत्वं समतेति वर्णितम्।

उदाहरणार्थम् - वदान्यतरुमञ्जरीसुरभयः श्रवःपारणं
गुणा विदधते सतां जगति वीररुद्रप्रभोः।
सुधामधुरिमाधरीकरणचातुरी चुञ्चवो

वियच्चरतरङ्गिणीविहरदूर्मिमर्मस्पृशः।।

अत्र पादचतुष्टयेऽपि तुल्यवद्धणनात् समत्वम्। न कुत्रापि उच्चारणसमये विषमता अनुभूयते। तेन हि विद्यते समता गुणः। रचनाशैली अदितः अन्तपर्यन्त समाना एव अस्ति।

**(४) माधुर्यम् :**

लक्षणम् - या पृथक्पदता वाक्ये तन्माधुर्यं प्रकीर्त्यते।

दीर्घसमासविरहितं पृथक्पदत्वं माधुर्यमिति। प्रतिपदं पृथक्तया प्रतीयते।

उदाहरणार्थम् - यशःश्रियः काकतिभूपतेर्दिशां नितम्बबिम्बेषु दुकूललरीतयः।

उरोजयोर्मौक्तिकहारविभ्रमाः शिरस्सु जातीकुसुमस्त्रगुज्जवलाः।।

अत्र हि पृथक्पदत्वप्रतीतिः तस्मात् माधुर्यम्। तेन ह्याह्लादकत्वं जायते।

**(५) सौकुमार्यम् :**

लक्षणम् - सुकुमाराक्षरप्रायं सौकुमार्यं तदुच्यते।

सुकुमारत्वं नाम सानुस्वारकोमलवर्णत्वम्। वर्णानाम् अजरठत्वम् अपारुष्यं वा कोमलत्वं श्रुतिसुखत्वमिति। रचनायां सुकुमारत्वं सौकुमार्यमित्यर्थः।

यथा - अमन्दानन्दनिष्यन्दसुन्दरीवदनेन्दुभिः।

नगरे काकतीन्द्रस्य दिवाप्याभाति चन्द्रिका।।

काकतीन्द्रस्य नाम प्रतापरुद्रस्य नगरे दिनेऽपि अमन्दानन्दं वितरन्ती चन्द्रिका नायिकानां मुखचन्द्रे विलसिता दृश्यते। अत्र वर्णानां सुकुमारत्वमस्ति।

**(६) अर्थव्यक्ति :**

लक्षणम् - यत्तु सम्पूर्णवाक्यत्वमर्थव्यक्तिं वदन्ति ताम्।

यत्र झटित्यर्थप्रतिपत्तिहेतुत्वं स गुणः अर्थव्यक्तिः। तात्पर्यं वाक्यस्य सम्पूर्णता अर्थव्यक्तिः इत्युच्यते। यथा -भाग्यं मध्यमलोकनिघ्नमधुना येनास्य संरक्षिता

जातः खेलति वीररुद्रनृपतिर्निःसीमशौर्योदयः।

यद्वा त्रीण्यपि विष्टपानि दधते धन्यत्वमंशो हरे-

र्यत् साक्षादवतीर्य काकतिकुले स्वैरं समुज्जृम्भते।।

अर्थप्रतिपादने वाक्यस्य निराकाङ्क्षतया परिपूर्णत्वादर्थव्यक्तिः अत्र।

**(७) कान्तिः**

लक्षणम् - अत्युज्जवलत्वं बन्धस्य काव्ये कान्तिरितीष्यते।

काव्ये बन्धस्य नाम काव्यरचनायाः अत्युज्जवलत्वं कान्तिः इति। यदभावे पुराणच्छाया वा पुरातनप्रबन्धच्छायेत्युच्यते। यथा -

जेतुः काकतिवीररुद्रनृपतेर्जैत्रप्रयाणोत्थिते
क्षोणीरेणुभरे नभस्यतिभृशं भूविभ्रमं बिभ्रति।
जाता मर्त्यनदी विशङ्कटतटीदीर्घा वियद्दीर्घिका
गाढं गूढतमा च गौतमनदी पातालगङ्गायते।।

जेतुः काकतिवीररुद्रनृपतेः यदा विजययात्रा आरब्धा तदा अश्वरथैः अन्तरिक्षे भूविभ्रमः सञ्जातः। वियद्दीर्घिका मन्दाकिनी विशालाभ्यां तटीभ्यां दीर्घा सती मर्त्यनदी भागीरथी जाता। तथा गूढतमा रजोमयभूमेरधो वर्तमाना गौतमनदी भोगवती भवतीत्यत्र औज्जवल्यं परिकीर्तितम्। अतः कान्तिरिति गुणः अस्मिन् श्लोकेऽस्ति।

### (८) औदार्यम् :

लक्षणम् - विकटाक्षरबन्धत्वमार्यैरौदार्यमिष्यते।

औदार्यं नाम विकटाक्षरबन्धत्वम्। यस्मिन् सति नृत्यन्तीव पदानीति जनस्य वर्णभावना भवति तद्विकटत्वम्। लीलायमानत्वमित्यर्थः।

यथा - जग्ध्वा भूयांसि मांसान्यहमहमिकया बद्धगार्ध्यान् सपीत्या
मस्रस्योच्चैस्तरास्थ्युत्कषणभवकटत्काररौद्राग्रदंष्ट्रान्।
संबिभ्राणाः क्षपाटान् द्विपगलितवसानिर्झरान्तर्नदीष्णान्
कुर्वन्त्यायोधनोर्व्यो भयमवनिभृतामन्ध्रसैन्येन सृष्टाः।

अहमहमिकया बहु मांसं खादित्वा रक्तस्य सहपानं कर्तुमुत्सुकाः, अस्थिसङ्घर्षणस्य अनुकरणशब्दैः येषां दन्ताः तीक्ष्णाः सञ्जाताः, गजानां मदेन परिपूर्णानिर्झरेषु स्नानं कर्तुं कुशलाः भूतबेतालादयः यत्र सन्ति सा रणभूमिः इतरनृपान् भाययाति। आन्ध्रसैन्यैरस्याः रणभूमेः सर्जनं कृतमस्ति। श्लोकेऽस्मिन् सर्वाण्यक्षरणि विकटाक्षरणि।

**स्वावलोकनप्रश्नाः**

(१) भोजराजस्य मते कति गुणाः ?

(२) प्रसिद्धार्थपदत्वं कस्य गुणस्य लक्षणम्?

(३) सौकुमार्यगुणस्य वैशिष्ट्यं किम्?

(४) 'काव्यशोभायाः कर्तारो धर्माः गुणः' इति कः प्रत्यपादयत्?

(५) अर्थव्यक्तिगुणस्य को विशेषः

**(९) उदात्तता :**

लक्षणम् - श्लाघ्यैर्विशेषणैर्योगो यस्तु सा स्यादुदात्तता।

प्रशंसायुक्तविशेषणानां योगस्तु उदात्तता इत्युच्यते।

यथा - बृंहमाणगजाकीर्णा ह्रेषमाणहयाकुला।
सङ्क्रीडत्स्यन्दना क्ष्वेडभटा रुद्रविभीश्चमूः।।

वीररुद्रस्य सेना विशालैः गजैराकीर्णा वर्तते। ह्रेषमाणाश्वैः आकुला च वर्तते। तथैव रथस्य सङ्क्रीडनेन युक्ता अस्ति। अपि च भटानां सिंहनादैः परिपूर्णा दृश्यते। अत्र हि प्रशंसापूर्णानि विशेषणानि सर्वत्र प्रयुक्तानि। अतः उदात्ततेति।

**(१०) ओज :**

लक्षणम् - ओजः समासभूयस्त्वम्।

यत्र समासस्य आधिक्यं तत्र ओज इति। पदरचनायां समासबाहुल्यम् ओजः।

उदाहरणार्थम् - उद्दामद्विरदौघदानलहरीसौरभ्यलोभभ्रमद्
भृङ्गश्रेणिनिबद्धझङ्कृतिकलावाचालितप्राङ्गणाः।
निःसीमप्रथमानभूमविभवारम्भप्रियंभावुका
मोदन्ते भुवि वीररुद्रनृपतेर्विदग्टहश्रेणयः।।

श्लोकेऽस्मिन् समासभूयस्त्वं दृश्यते। दीर्घसमासरचनया ओजः गुणोऽत्र दृग्गोचरः भवति। वीररुद्रविदुषां गजान्तलक्ष्मीर्माहात्म्यं चात्र प्रतिपादितम्। वीररुद्रमहाराजस्य राज्ये विद्वांसः अतीव सुखमनुभवन्ति। तेषां गृहप्राङ्गणे मदोन्मत्तगजानां समूहास्सन्ति। यत्र मदगन्धलोभेन भ्रमराः भ्रमन्ति। तेषां गुञ्जारवैः प्राङ्गणाः वाचालिताः। ताः भूमविभवः तेषां प्रियाः भवन्ति।

**(११) सुशब्दता :**

लक्षणम् - सुपां तिङां च व्युत्पत्तिः सौशब्दं परिकीर्त्यते।
सुबन्ततिङन्तविशेषाणां व्युत्पत्तिः सौशब्द्यमिति कथ्यते।

यथा - आशामण्डलकूलमुद्वहकथैरभ्रङ्कषैर्वैभवे
रक्षन् सुप्रजसः प्रजास्त्रिभुवनक्षेमङ्करप्रक्रियः।
दुष्टानां भुवि निप्रहन्तुलतुलैराढयंभविष्णुर्गुणै-
र्भूम्ना सञ्चरतेऽद्य काकतिकुले रुद्रावतारो हरिः।।

कूलमुद्वहन्तीति कूलमुद्वहाः कथाः यैस्तैः नाम दिग्न्तप्रसिद्धैः उत्कृष्टैः वैभवैः शोभना प्रजा यासां ताः सुप्रजसः रक्षन्, अतः त्रिभुवनक्षेमंकरप्रक्रियः गुणैराढयो भवतीत्याढ्यंभविष्णुः, वीररुद्रः दुष्टानां निप्रहन्तुं भूम्ना नाम महिम्ना सञ्चरते। इत्यत्र सौशब्द्यं नाम गुणः।

**(१२) प्रेय :**

लक्षणम् - प्रेयः प्रियतराख्यानं चाटूक्तौ यद्विधीयते।

चाटूक्तौ इत्युक्ते प्रियोक्तौ यत् प्रियतराख्यानं प्रियतरकथनं वेति प्रेयः।

यथा - दाक्षिण्यं त्वयि दक्षता त्वयि दया त्वय्युन्नतत्वं त्वयि
प्रागल्भ्यं त्वयि पौरुषं त्वयि कलासम्पत्त्वयि श्रीस्त्वयि।
औदार्यं त्वयि धीरता त्वयि जगद्धौरेयता च त्वयि
श्रीमत्काकतिनाथ पालय भुवं वैरिञ्चकल्पान् शतम्।।

श्लोकेऽस्मिन् श्रीमत्काकतिनाथस्य कृते प्रियतरकथनमस्ति। तस्मात् प्रेयः गुणः।

**(१३) समाधि :**

लक्षणम् - समाधिरन्यधर्माणां यदन्यत्राधिरोपणम्।

अन्यधर्मस्य अन्यत्र अधिरोपणम् इत्युक्ते आरोपणं समाधिरिति। चेतनस्य अचेनेऽऽरोपणमिति वा अचेतनस्य चेतने आरोपणमिति समाधिः गुणः।

यथा - पृच्छन्ती दुग्धसिन्धुं कुशलमनुसरन्त्यादराच्छङ्कराद्रिं
चाटूक्त्या मानयन्ती मुहुरमरनदीं चन्द्रमग्रे हसन्ती।
वैधात्रीं यानहंसाबलिमनुकृपया स्वागतं व्याहरन्ती
लोकेषु त्रिष्वमीषु प्रभवति महती वीररुद्रस्य कीर्तिः।।

अत्र कुशलप्रश्नादेः चेतनधर्मस्य अचेतनायां कीर्तौ अधिरोपणात् समाधिः। दुग्धसिन्धं कुशलं पृच्छन्ती, शङ्कद्रिम् अत्यादरात् अनुसरन्ती, मधुरोक्तिभिः अमरनद्याः आदरं कुर्वती, चन्द्रस्या ग्रेहसन्ती, विधातुः यानहंसबलिम् अनुकृपया स्वागतं व्याहरन्ती वीररुद्रस्य महती कीर्तिः त्रिषुलोकेष्वापि प्रभावं जनमीति।

**(१४) विस्तार :**

लक्षणम् - समर्थनप्रपञ्चोक्तिरुक्तस्यार्थस्य विस्तरः।

पूर्वोक्तार्थस्य समर्थनकर्त्री प्रपञ्चोक्तिरेव विस्तरः।

यथा - लोकेषु त्रिषु काकतीश्वरगुणान् स्तोतुं मुहुर्वीक्षितुं
श्रोतुं बह्वभिनन्दतुं च फणिनामेकः क्षमो नायकः।
यद्वक्त्राणि सहस्रमस्य कृतिनो यद् द्वे सहस्रे दृश-
स्ता एव श्रुतयः फणा दशशतान्यत्यद्भुतान्दोलने।।

त्रिषु लोकेषु एकः एव फणिनायक इत्युक्ते शेषनागोऽस्ति। यः काकतीश्वरगुणान् स्तोतुं वारंवारं द्रष्टुं, श्रोतुं, बह्व्याभिनन्दितुं समर्थः। अस्य भाग्यशालिनः शेषस्य सहस्रमुखानि तथा च द्विसहस्रनेत्राणि श्रुतयः नाम कर्णाः सञ्जाताः। तथैव दशशतानि फणास्तु भूमेरद्भुतान्दोलने संलग्नास्सन्ति। अत्र हि पूर्वोक्तचरणद्वये योऽर्थः तस्य समर्थनाय उत्तरार्धचरणद्वयं प्रकल्पितम् अतः विस्तर इति गुणः।

**स्वावलोकनप्रश्नाः**

(१) 'उदात्तता' गुणस्य लक्षणं लिखत।

(२) कस्मिन् गुणे समासभूयस्त्वं विद्यते?

(३) सौशब्दं कदा परिकीर्त्यते?

(४) विस्तरगुणस्य को विशेषः?

**(१६) सम्मितत्वम् :**

लक्षणम् - यावदर्थपदत्वं तु संमितत्वमुदाहृतम्।

यान्तोऽर्थाः तावन्त्येव पदानि यत्र भवन्ति तत्र संमितत्वम्। अभिधेयापेक्षया यत्रेकमपि पदं न न्यूनं नाप्यधिकं तत्संमितमित्यर्थः।

यथा - काकतीयनरेन्द्रस्य कीर्तिचन्दनचर्चनम्।
दिगङ्गना वितन्वन्ति वतंसीकृततद्गुणाः।।

दिगङ्गनाः काकतीयनरेन्द्रस्य कीर्तिरूपचन्दनेन अर्चनं कुर्वन्ति कारणं ताभिः तस्य गुणाः कर्णभूषणं कृतास्सन्ति। अत्र यावानर्थः तावन्त्येवपदानि।

**(१६) गाम्भीर्यम् :**

लक्षणम् - ध्वनिमत्ता तु गाम्भीर्यम्।

पद्यस्य ध्वनियुक्तता गाम्भीर्यमित्युच्यते।

यथा - विषं कौक्षेयके गङ्गा कीर्तौ दिग्वसनं रिपौ।
इन्दुर्मुखे च रुद्रस्य काकतीयस्य दृश्यते।।

अत्र शङ्करस्य कण्ठे विषं, मौलौ गङ्गा, कटिस्थले दिग्वस्त्रं, शिरसि च चन्द्र इति ध्वन्यते। तस्मात् गाम्भीर्यम्।

**(१७) सङ्क्षेप :**

लक्षणम् - सङ्क्षिप्तार्थाभिधानं यत्, तत् सङ्क्षेपः प्रकीर्त्यते।
सङ्क्षेपेण अर्थकथनमेव सङ्क्षेप इति।

यथा - वंशोऽस्ति काकतीयानां तत्रासन् बहवो नृपाः।
तेषां भाग्यविवर्तोऽयं वीररुद्रो नरेश्वरः।।

भाग्यविवर्तः नाम भाग्यपरिपाकः। अर्थस्तु स्पष्ट एव। अत्रातिविस्तरकथनयोग्यार्थस्य सङ्क्षेपोक्तेः सङ्क्षेपः दृश्यते।

**(१८) सौक्ष्म्यम् :**

लक्षणम् - अन्तः संजल्परूपत्वं शब्दानां सौक्ष्म्यमुच्यते।

समीचीनो जल्पः संजल्प इति। विवक्षितार्थः सोऽन्तःकृतो गर्भितो यत्र तद्रूपत्वमन्तः नाम संजल्परूपत्वं सौक्ष्म्यमित्यर्थः।

यथा - अध्यधः परिसंश्लिष्टाः ष्ठाकृञ्भूधातवः सदा।
वर्तन्ते काकतीयेन्द्रे कर्तर्यन्यत्र कर्मणि।।

अधि परिशब्दसम्बन्धः 'स्था' धातुरिति। अधः इति अव्ययसम्बन्धयुक्तः कृञ् धातुरपि यदा प्रयुज्यते तदा काकतीयेन्द्रे सदा कर्तरि वर्तते।

अत्राधितिष्ठत्यधः करोति परिभवतीत्यन्तः संजल्परूपत्वात् सौक्ष्म्यं भवति।

**(२०) प्रौढि :**

लक्षणम् - प्रौढिरुक्तेः परीपाक इति काव्यविदो विदुः।

काव्यविदः उक्तेः वैचित्रीविशेषः नाम परीपाकः प्रौढिरिति कथयन्ति। यथा -

वीप्सा पद्मभवस्य चन्द्रमुकुटस्यावृत्तिराम्रेडितं
दैत्यारेः प्रतिबिम्बनं सुरगिरेरिन्दोः समुत्तेजनम्।

कर्णादेः पुनरुद्भवः सुरतरोः सर्वस्वमाविष्क्रिया
स्वर्धेनोरिति तर्कयन्ति कवयः श्रीवीररुद्रप्रभुम्।।

कवयः वीररुद्रनृपतिविषये एवं तर्कयन्ति यदयं ब्रह्मणः वीप्सा नाम द्विर्भावः, भालचन्द्रावृतिः, विष्णोराम्रेडनं, सुरगिरेः इत्युक्ते हिमाचलस्य प्रतिबिम्बनं, इन्द्रोः समुत्तेजनमस्ति। कर्णादेः पुनरुद्भवः, कल्पवृक्षस्य सर्वस्वं तथा च कामधेनोराविष्कार अयम् इति। सर्वत्र द्वितीयब्रह्मादिरूपत्वमित्यर्थः। अत्र वीररुद्रे विरिञ्चिवीप्साद्यारोपलक्षणवैचित्रीवशात् प्रौढिः।

**(२१) उक्ति :**

लक्षणम् - विदग्धभणितिर्या स्यादुक्तिं तां कवयो विदुः।

यथा - दृष्टा कमलासक्ति राज्ञसत्व सुभग चित्रचरितस्य।
भास्वानपि त्वं तां कुवलयलक्ष्मीं प्रसाधयसि।।

हे सुभग! तव चरित्रं विचित्रमस्ति यतः त्वं राजा भूत्वापि कमलासक्तः तथा च भास्वानपि कुवलयलक्ष्मीं प्रसाधयसि। अत्र राज्ञः चन्द्रस्यापि कमलासाक्तिः, भास्वतः सूर्यस्यापि कुवलयप्रसाधनमित्येवं विदग्धभणितिः अश्लीलं परिह्रियते।

**(२२) रीति :**

लक्षणम् - यथोपक्रमनिर्वाहो रीतिरित्यभिधीयते।

उपक्रमानुसारं यत्र निर्वाहः तत्र रीतिः। निर्वाह इत्युक्ते उपसंहारः इति।

यथा - षड्गुणान् सेवते राजा षड् रिपूनवमन्यते।
षड् दर्शनान्युपादत्ते षड् बलानि च वीक्षते।।

षड्गुणाः - सन्धिः, विग्रहः, यानम्, आसनम्, द्वैधीभावः तथा च आश्रयः।

षड्रिपुः - कामः, क्रोधः, लोभः, मात्सर्यम्, मोहः मदः च।

षड्दर्शनानिः - साङ्ख्यम्, योगः, पूर्वमीमांसा, उत्तरमीमांसा, न्यायः, वैशेषिकञ्च।

षड्बलानिः - भृत्यबलं, सत्यम्, मैत्रम्, स्त्रैणं, आटविकं अमित्रम् च।

अत्र पादचतुष्टयेऽप्यादौ षड्पदोपादानात् यथोपक्रमनिर्वाहणं रीतित्वम्।

**(२३) गति :**

लक्षणम् - गतिर्नाम सुरम्यत्वं स्वरारोहावरोहयोः।

स्वाराणामारोहो दीर्घाक्षरप्रायत्वम्। अवरोहो वैपरीत्यम्। यत्र स्वराणाम् आरोहावरोहे

सुरम्यत्वं तत्र गतिः। यथा -

प्रकाश्ये त्रैलोक्ये सततमतुलैः काकतिविभोः
महोभिर्निःसीमैर्दिनकरकराटोपपटुभिः।
तमः कृत्स्नं शोकज्वलदनलरोचिः परिचयं
दधत्स्वप्युद्वेलत्यरिनृपमनस्स्वेव सततम्।।

काकतिप्रभोः अतुलैः निःसीमैः सर्वव्यापकतेजोभिः तथैव सूर्यकिरणानाम् अपेक्षया अत्यधिकतेजोभिः त्रैलोक्यं निरन्तरं प्रकाशमानमस्ति। अतः अन्धकाररूपशोकानग्निः वैरिहृदये प्रज्वलितः। तेन हि तेषां हृदयानि सततम् उद्वेलितानि। अस्यार्थः विश्वव्यापिनि वीररुद्रतेजसि तमसः वैरिहृदये एव अवकाशः। अत्र पूर्वार्धे दीर्घाक्षरप्रायत्वात् स्वरस्यारोहः। उत्तरार्धेऽवरोहः। तस्मात् गतिरिति गुणः।

एवं गुणविवेचनमत्र व्यपदिष्टं ग्रन्थकारेण।

**स्वावलोकनप्रश्नाः**

(१) गाम्भीर्यम् इत्युक्ते किम्?

(२) सङ्क्षेपार्थकथनं कुत्र आवश्यकं भवति?

(३) संजल्पः इत्यस्य कोऽर्थः?

(४) 'रीतिः' इति गुणस्य किं लक्षणम्?

(५) भाविकामिति कदा उदाहियते

## ४.३ उपसंहारः

प्रकरणेऽस्मिन् गुणस्वरूपं विवेच्य शब्दार्थगुणान् न्यरूपयत् ग्रन्थकारः। गुणलक्षणोदाहरणञ्च सर्वत्र प्रदत्तम्। तेन हि काव्यगुणज्ञानं लीलया सम्भवति। एतेषां गुणानामर्थगतत्वं केचिदिच्छन्ति। प्राचामाचार्याणां मतेन सङ्घटनाश्रयत्वमेव गुणानाम् विद्यते। तदुक्तम् अलङ्कारसर्वस्वे 'सङ्घटनाधर्मत्वेन शब्दार्थधर्मत्वेन च गुणालङ्काराणां व्यवस्थानम्' इति। सङ्घटनाशब्दार्थरूपाश्रयभेदेन गुणानां स्वरूपभेदः वर्णितोऽस्ति अत्र।

## ४.४ प्रश्नाः

(१) प्रतापरुद्रीयदिशा काव्यगुणान् विवेचयत।

(२) सोदाहरणं गुणस्वरूपं निरूपयत।

(३) व्याख्यां कुरुत।

(१) प्रसादः (२) माधुर्यम् (३) कान्तिः (४) उदात्तता

(५) प्रेयः (६) विस्तारः (७) सौक्ष्म्यम् (८) गतिः